Digitized by Arya Samaj Foundation Chennai and eGangotri

अर्वाचीन संस्कृतम् Vol. 19 1997

Digitized by Arya Samaj Foundation Chennai and eGangotri
CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

130722

Stock Verification-2024

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अर्वाचीनसंस्कृतम्

(अर्वाचीनसंस्कृतपरकं त्रैमासिकं पत्रम्)

एकोनविंशे वर्षे प्रथमोऽङ्कः

Vol. 19 30 C

१५ जनवरी १९९७

Stock Verification-2024

प्रधानसम्पादकः

डा० रमाकान्त शुक्लः

एम०ए०, पीएच०डी०, साहित्याचार्यः

सांख्ययोगाचार्यः

130722

LIBRARY
Gurukul Kangri Vishwavidyalaya
HARDWAR

देववाणी-परिषद्, दिल्ली
वि० २०३३ स्थापनाब्द १९७६

देववाणी-परिषद्, दिल्ली

९ वाणी-विहारः, नयी दिल्ली-११००५९

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परामर्शदातृ-मण्डलम्

1. आचार्य श्रीनिवास रथः
2. डा० कृष्णकान्त शुक्लः
3. 'अभिराज' डा० राजेन्द्र मिश्रः
4. डा० उमाकान्त शुक्लः
5. डा० विष्णुकान्त शुक्लः
6. डा० भास्कराचार्य त्रिपाठी

अर्वाचीनसंस्कृतम् (१९/१)

(१५ जनवरी १९९७)

१. सम्पादकीयम्	रमाकान्त शुक्लः	क-ख
२. आधुनिकसंस्कृतकाव्योपलब्धयः	डा० राधावल्लभ त्रिपाठी	१-२६
३. देशवर्णनम्	डा० देवनारायण झा	२७-२८
४. वन्द्यतां कापि सा शासनासन्दिका	रमाकान्त शुक्लः	२९
५ मातः दुर्गे	डा० निरञ्जन दाशः	३०
६. सर्वे सन्ति मदीयाः	डा० शिवशरणशर्मा द्विवेदी	३१
७. नौकाः	डा० प्रकाश पाण्डे	३२
८. दशमविश्वसंस्कृतसम्मेलनावसरे संस्कृतकविसम्मेलनम्	रमाकान्त शुक्लः	३३-३४
९. दशमविश्वसंस्कृतसम्मेलनेऽव्यवस्था	”	३४
१०. दशमविश्वसंस्कृतसम्मेलनपूर्तौ	आचार्यश्रीनिवासरथः	३५
११. जार्जकार्डोना:	डा० दीक्षितपुष्पा	३५
१२. लब्धं भवतीनां पत्रम्	डा० कुमुद कान्हे	३६
१३. संस्कृत-जगद्वार्ता	अभिनव शुक्लः	३७-३९
१४. देववाणी-परिषद्वार्ता	आनन्दवर्धन शुक्लः	३९
१५. कीर्तिशेषेभ्यो देववाणी-परिषत्सदस्येभ्यः श्रद्धाञ्जलिः		३९
१६. शुद्धिपत्रम्		४०
१७. विज्ञापनम्		४१-४२

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकीयम्

अर्वाचीनसंकृतस्य पाठकेभ्यो नववर्षमङ्गलकामनाः समर्प्यन्ते। १९९७ तमस्य वर्षस्य जनवरीमासः संस्कृतज्ञानां संस्कृतप्रणयिनां च कृते मोदावहस्तिष्ठति। प्रथमद्वितीयसप्ताहयोः (३–६.१.१९९७ तारिकासु) बेंगलौरनगरे दशमं विश्वसंस्कृतसम्मेलनं मानवसंसाधनविकासमन्त्रालयस्य राष्ट्रियसंस्कृतसंस्थानस्य बेंगलूरस्थतरळबाळुकेन्द्रस्य च संयुक्ततत्त्वावधाने समायोज्यत। इदमधिवेशनं विश्वसंस्कृतसम्मेलनस्य रजतजयन्तीवर्षे सम्पन्नम्। विधानसौधसभागारे ४.१.९७ तारिकायां प्रधानमन्त्रिणा श्री एच० डी० देवगौडा– महोदयेन समुद्घाटितस्यास्य सम्मेलनस्य दूरदर्शनेन राष्ट्रियचैनले साक्षात्प्रसारणं कृतम्। संयोजकस्य डा० शिवमूर्तिमहास्वामिनः अध्यक्षस्य डा० रामकरणशर्मणः धन्यवादकर्तुः डा० कमलाकान्तमिश्रस्य, सञ्चालयित्र्या डा० एस० लीला–महाभागायाश्च संस्कृतभाषणैरुद्घाट्नसत्रं महिमानमभजत। प्रधानमन्त्रिणा आंग्लभाषायां कर्णाटकमुख्यमन्त्रिणा च कन्नडभाषायामभिभाषितम्। शेषे सर्वे कार्यक्रमाः तरळबाळु–केन्द्रे सम्पन्नाः। षट् शतानि शोधपत्राण्यपठ्यन्त। ६.१.९७ तारिकायां श्रवणबेलगोला – बेलूर – हालेबीडुप्रभृतिदर्शनीयस्थलानां यात्राकार्यक्रमः समायोज्यत। ७.१.९६ तारिकायां तरळबाळुकेन्द्रप्रेक्षागारे संस्कृतकविसम्मेलनमायोज्यत यस्याध्यक्ष्यम् आचार्यश्रीनिवासरथेन सञ्चालनञ्च डा० भास्कराचार्यत्रिपाठि – रमाकान्तशुक्लाभ्यां कृतम्। त्रिशत्प्रायैः कविभिः स्वरचनाः प्रस्तुताः। डा० शिवमूर्तिमहास्वामिभिः पद्यमया आशीर्वादाः प्रदत्ताः। डा० रामकरणशर्मणा 'सर्वमङ्गला' काव्यतः निरुत्तरशतकांशाः श्राविताः। ८.१.९७ ई० तारिकायां पण्डित–परिषदि 'मन्दाकिनी'– 'धर्महिन्दुजा–अन्ताराष्ट्रियभारतीयविद्याकेन्द्रयोः' संयुक्ते तत्त्वावधाने संस्कृतभाषिणां वैदेशिक–विदुषां सम्मानसमारोहः समायोज्यत। अन्येऽपि सांस्कृतिकाः कार्यक्रमाः समायोज्यन्त। ग्रन्थप्रदर्शनी अप्यायोज्यत। एकादशं सम्मेलनं इटलीदेशे तुरीनोनगरे २००० तमे खैष्टाब्दे भविष्यति। सम्मेलने त्रयोदशशतप्रायाः विद्वांसः समुपस्थिताः।

दशमे विश्वसंस्कृतसम्मेलने पेन्सल्वानियाविश्वविद्यालयादागतः पाणिनीये शास्त्रे सम्यगधीती भारतीयविद्याचार्यो जार्जकार्डोनामहाशयः संस्कृतभाषणेन विद्वच्चेतांसि बलादावर्जयामास। तमवलम्ब्य डा० पुष्पादीक्षितमहाभागया एका रचना बंगलोरे कृता। दशमविश्वसंस्कृतसम्मेलनसम्पूर्तिसमारोहे आचार्यश्रीनिवासरथमहाभागेन पृथ्वीवृत्तेन स्वभावोद्गारा एकस्यां रचनायामभिव्यक्ताः। उभे अपि रचने अत्राङ्के दीयेते।

अस्मिन्नवसरे विभिन्नाभिः संस्थाभिर्लेखकैश्च विद्वद्भ्यः साहित्यपि समर्पितम्। ४–७.१.९७ तारिकासु तरळबाळुकेन्द्रे 'K-4' इत्यस्मिन् महाकक्षे विश्वस्य विभिन्नेभ्यो भागेभ्यः समागतेभ्यः सार्धद्विशतप्रायेभ्यो विद्वद्भ्यः श्री १०८ पं० सत्यदेववासिष्ठप्रणीतस्य 'श्रीविष्णुसहस्रनामसत्यभाष्यस्य' प्रतिरूपाणि सम्मेलनाध्यक्षेण डा० रामकरणशर्मणा, कुलपतिभिः डा० मण्डन मिश्र – डा० वाचस्पति उपाध्याय – डा० एन. पी. उन्नि – डा० रामानुजताताचार्य – डा० जयमन्तमिश्रैः, राष्ट्रियसंस्कृतसंस्थाननिदेशकेन

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

डा० कमलाकान्तमिश्रेण, आचार्यश्रीनिवासरथ – गौतमपटेल – आर. पी. गोल्डमैन – गिलबर्ट पौलेट – पं० वसंत गाडगीळ–सत्यपाल नारंग–प्रभृतिभिर्विद्वद्भिः ग्रन्थसम्पादकेनैतपंक्तिलेखकेन च समर्पितानि। 'मेलुकोटेवासिना तरुणविदुषा उमाकान्तभट्टेन सम्पादिता 'छन्दस्वती' नाम्नी षाण्मासिकी पद्यमयी पत्रिकापि मया तत्र लब्धा यस्यां सम्पूर्णापि सामग्री पद्यमय्येव प्रकाशिता। 'संविद' इत्येतस्याः पत्रिकायाः दशमविश्वसंस्कृतसम्मेलनविशेषाङ्कः, अलङ्कारसङ्ग्रहः, आचार्यशतकत्रयं, गाण्डीवविशेषाङ्कः राजस्थानपत्रिकाङ्काः, श्रीमद्दासबोधः, राष्ट्रियसंस्कृत–संस्थानप्रकाशितास्त्रयो ग्रन्थाः शोधपत्रसारसंग्रहः विश्वसंस्कृतनाम्नी स्मारिका च यथाशक्यं विद्वत्सु वितीर्णा अभूवन्।

तृतीये सप्ताहे (१७.१.६७ ई० तारिकायां) नवदिल्ल्यां राष्ट्रीयसंग्रहालये आकाशवाण्या समायोजिते सर्वभाषाकविसम्मेलने डा० नलिनी शुक्ला 'भारतजननि सुशरणे!' इतीमां रचनां पठति यस्याः प्रसारणं चतुर्थे सप्ताहे भवति। कोटावास्तव्यो डा० बशीर अहमद 'मयूख' एतस्या हिन्दीकाव्यानुवादं प्रस्तौति। २५.१.१९९७ तारिकायां रात्रौ १०:०० वादनवेलायामस्य कविसम्मेलनस्य आकाशवाणीकेन्द्रेभ्यः प्रसारणं भविष्यति।

तृतीय एव सप्ताहे (२०.१.६७ ई० तारिकायां) दिल्ल्यां 'दिल्ली संस्कृत अकादमी' गणतन्त्रदिवसमुपलक्ष्य अ० भा० संस्कृतकविसम्मेलनमायोजयति।

चतुर्थपञ्चमयोः सप्ताहयोः (२८.१.६७ – ३०.१.६७) कलिकातानगरे अ० भा० प्राच्यविद्यासम्मेलनस्यैकोनचत्वारिंशमधिवेशनमायोज्यते यत्रेदम्प्रथमतया अर्वाचीनसंस्कृत–विभागोऽपि संयोज्यते यस्याध्यक्ष्यं डा० रामकरणशर्मणा क्रियते। एतत्पंक्तिलेखकस्य सर्वत्रैवोपस्थितिर्भूता भविता च। अयं सर्वत्रैव यथा वयोवृद्धानां विदुषां तथैव वृद्धैरपि मानितानां किञ्च संस्कृतस्य सेवायां सर्वात्मना लग्नानां यूनामपि दर्शनं करोति करिष्यति च। किन्तु राष्ट्रपतिना पुरस्करणीयेषु विद्वत्सु एकमपि तरुणं न पश्यति। किमस्मद्देशे एकोऽपि तरुणः संस्कृतस्य अप्रतिमो विद्वान् नास्ति? बेंगलोरे मया एकविंशतिवर्षदेशीयो बालगारु रुचिराचार्यस्तरुणो दृष्टः, येन अष्टादशवर्षवयस्येव 'आचार्यशतकत्रयं' नाम काव्यं प्रणीतम्। अस्मिन्वर्षे साहित्याकादमीपुरस्कारदातृभिस्तु युवा संस्कृतरचनाकारः श्रीकेशवचन्द्रदाशः स्वदृष्टिपथमानीतः किन्तु शास्त्रिभवनं यूनो विदुषो न पश्यति। गतवर्षेऽपि मयास्मिन् विषये संकेतितमासीत्। इदानीञ्च पुनरुक्तिः क्रियते। शिक्षामन्त्रालयसचिवोऽपरौ च सदस्यौ किं संस्कृत–जगते उत्तरं दास्यन्ति कथं ते 'राष्ट्रपति – पुरस्कारार्थं' स्फुरद्रत्नसंकाशान् अनेकग्रन्थकर्तॄन्, अध्ययनाध्यापनपरान् धर्मवृद्धान् तरुणान् प्रौढान् वा संस्कृतविदुषो न पश्यन्ति? स्थाणोरत्रापराधः पुरुषापराधो वा?

'रमालयः' आर ६, वाणी–विहारः,
नयी दिल्ली–११००५९
१५.१.१९९७ ई०

(रमाकान्त शुक्लः)
प्रधानसम्पादकः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आधुनिकसंस्कृतकाव्योपलब्धयः[१]

(त्रिपाठी डा० राधावल्लभः, सागरस्थ डा० हरिसिंह गौर–विश्वविद्यालयस्य संस्कृत–विभागाचार्याध्यक्षो देववाणी–परिषदध्यक्षश्च)

साहित्यसंवर्धनरताया सुरसरस्वतीसमुपासिकाया देववाणी–परिषदः सप्तदशमष्टादशमेकोनविंशञ्च संयुक्तमधिवेशनमिदं सम्बोधयतो मे महतीं प्रसन्नताभनुभवति चेतः। परिषदियं नानाग्रन्थरत्नप्रकाशनेन **अर्वाचीनसंस्कृत**' मिति पत्रस्य च नियमितं निस्सारणेन महदवदानं प्रकटीकृतवती संस्कृत–जगति। नवदिल्यां वाणी– विहारस्थे **'रमालये'** श्रीमता रमाकान्तेन अतीतेषु अष्टादशवर्षेषु अर्वाचीनसंस्कृतं नाम यो बालकल्पतरुपादपो रोपितः स इदानीं सरसकाव्यफलसम्भृतो गद्यस्कन्धधृतो नानानिबन्धशाखाप्रशाखासंवलित–स्तारुण्यश्रियं धत्ते।

परिषदियं संस्कृते विरच्यमानं नवीनं साहित्यं प्रोत्साहयति पुरस्करोति च। संस्कृतेन नानाशीलाः कवयः सम्प्रति कवयन्तो दरीदृश्यन्ते। केचन कालिदास–भारवि–माघ– श्रीहर्षा इव चकासति संस्कृते नभसि, अपरे स्वच्छन्दं मुक्तच्छन्दसि प्रगल्भन्ते, अन्ये च रमन्ते तेषु तेषु प्रयोगेषु। अर्वाचीनं संस्कृतसाहित्यं सुविशालं सुसमृद्धमपि वस्तुत उपेक्षितं विद्यते। अत एवास्मिन्नवसरे साहित्यमेतदधिकृत्य यथामति विमर्शं प्रस्तोतुमीहे।

समकालिकसंस्कृतकाव्यरचनायाः समग्रं परिदृश्यं वैविध्यपूर्णं सम्भावनागर्भितं च वरीवर्तीति न संशीतिः। अत्र नानाशीलाः कवयस्ताभिस्ताभिर्विधाभिः कवयन्तश्चरितार्थयन्ति ध्वनिकारस्य भणितिमिमाम्–

अवस्थादेशकालादिविशेषैरपि जायते।
आनन्त्यमेव वाच्यस्य शुद्धस्यापि स्वभावतः।।

(ध्वन्यालोके ४/७)

१. सागरनगरे ८.६.१९९६ ई. तारिकायामायोजिते 'देववाणी–परिषदः' सप्तदशेऽष्टादश एकोनविंशे च संयुक्ते वार्षिकाधिवेशने प्रदत्तमध्यक्षीयं भाषणम्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri
भट्टमथुरानाथशास्त्रि–म.म. रामावतारशर्म–अप्पाशास्त्रिराशिवडेकर–वेङ्कटरामराघवन्–जानकीवल्लभशास्त्रि–प्रभृतिभिः पुरातनैः बच्चूलालावस्थि–रामकरणशर्म–जगन्नाथपाठक–राजेन्द्रमिश्र–पुष्पादीक्षित– प्रभृतिभि–रर्वाक्तनैस्तथैव च केशवचन्द्रदाश–हर्षदेवमाधव–विन्ध्येश्वरीप्रसादमिश्र विनयादिभिर्नव्यैः सुतरां समृद्धिं नीता समकालिकी संस्कृतकाव्यपरम्परा। इह तावत् स्थालीपुलाकन्यायेन केचन रचनाकारा विमृश्यन्ते।

विंशशतकभवेषु संस्कृतसाहित्यकारेषु अप्पाशास्त्रिराशिवडेकरः (१८७३–१९१३ ई०) नूनं युगप्रवर्तक इति स्मरणीयः। अयं खलु **संस्कृतचन्द्रिकायाः सूनृतवादिन्याश्च** सम्पादनेन तामेव भूमिकां संस्कृतपत्रकारजगति निर्व्यूढवान् या भूमिका हिन्दीसाहित्यजगति महावीररप्रसादद्विवेदेन सरस्वतीपत्रिकाया सम्पादनेन तिलकमहाशयेन च **केसरीति** पत्रस्य सम्पादनेन निर्व्यूढा। अस्य **'अधर्मविपाकम्'** नाम प्रतीकात्मकं नाटकं वर्तमानकालिकीनां दुष्प्रवृत्तीनां साहसिकं चित्रणं प्रस्तौति। अप्पाशास्त्री संस्कृतगद्यस्य समर्थः शिल्पी बभूव, संस्कृतगद्याय चायं सर्वथा अद्यतनरूपं प्रददौ। अस्य मुक्तककाव्यानि न प्राचीनपद्यबन्धा इव आलङ्कारिकीं छटां प्रकटयन्ति, न वा भावानां तथाविधं नावीन्यं, परन्तु तत्रापि युगानुकूलतां संस्कृतकविता कविराशिवडेकरेण गमिता। अस्य **'पञ्जरबद्धः शुक'** इति कविताया हिन्दीभाषानुवादो राष्ट्रकविना मैथिलीशरणगुप्तेन विहितः। स चानुवादः सरस्वतीपत्रिकायां प्रकाशितः (अगस्तमासे, १९११ ई०)। अत्र अन्योक्त्या पराधीनराष्ट्रस्य वेदनामभिव्यनक्ति कविः। पराधीनता वस्तुतो राष्ट्रस्य जनस्य वा मृत्युरेव–

शुक सुवर्णमयस्तव पञ्जरो
न खलु पञ्जर एष विभाव्यताम्।
मुखमिदं ननु हेमशलाकिका-
रदनशालिमृतेरतिभीषणम्।।

तथैव **'तिलकमहाशयस्य कारागृहवास'** इति कवितायां ३७ पद्येषु राष्ट्रनायकस्य राष्ट्रदेवतायाश्च सपर्यया विधत्ते राशिवडेकरः। कारागारनिगडितस्य तिलकस्य कृते नितरां कोमलभावनाः अत्राभिव्यक्तिमुपागताः। राशिवडेकरेण

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

पारम्परिकविधया यानि काव्यानि रचितानि तत्रापि नव्ययुगस्य प्रतिध्वनिर्जोगुञ्जते, Digitized by Arya Samaj Foundation Chennai and eGangotri
दीनजनतायाश्च वेदनानुबोभूयते। यथा **'ऋतुचित्रम्'** इति काव्ये तेन षण्णामृतूनां वर्णनं व्यधायि। अत्र ग्रीष्मस्य भीषमतां विवृण्वन्नाह कविः–

शस्यं शुष्यति सर्वमेव भुवने पुंसां सहैवाशया
प्रम्लायन्ति लता नितान्तमधुना साकं प्रजानां मुखैः।
उद्दामं समुदैति च प्रतिपलं चोष्मा समं मानसै-
स्तापैः क्वापि विलीयते बत शुचावप्यागते यद् घनः।।

अत्र सहोक्तेरलङ्कारस्य प्रयोगः साहित्यस्याद्यतनस्य नवीनतां निदर्शयति। इयमेव नूतना सोपानसरणिराधुनिकसंस्कृतकविताया यत्र पारम्परिकं काव्यशास्त्रं समाजवादसोपानसरणिमारोहति। इत्थं चायं राशिवडेकरः **वल्लभविलापः मल्लिकाकुसुमम्** चेत्यादिकाव्येषु नः परम्परां नव्यस्वच्छन्दतावादेनापि योजयति। मालतीलतायाः केनचिद् यूना लूनं कुसुमं वीक्ष्य कविर्यान् भावानभिव्यानक्, ते निषादविद्धाण्डजदर्शनोत्थस्य शोकस्य समकालिक–साहित्यान्तर्वर्तिव्यक्तिवादस्य च युगपत् स्मारयन्ति। कविरिह मल्लिकासुमं वृन्ताच्च्युतं वीक्ष्य स्वस्या एकाकिताया विधुरस्थितेरपि चित्रणं प्रस्तौति।

महामहोपाध्यायो रामावतारशर्मा (१८७४–१९२९ ई०) यथा महापण्डितः उद्भटविचारकः दार्शनिकश्च तथैव श्रेष्ठो निबन्धकारः विलक्षणश्च कविरभवत्। तदीयं मुद्गरदूतम् मेघदूताश्रितकाव्यपरम्परायां नव्यं प्रस्थानं निर्मिमीते। दूतकाव्येषु इदम्प्रथमतयास्मिन् विप्रलम्भं सुकुमारभावान् ललनालावण्य–विच्छित्तिचित्रणं चापाकृत्य हास्यव्यङ्ग्यविडम्बनविरुपीकरणानि नव्यदूतकाव्य मान–दिण्डतयोपस्थापितानि। मुद्गरदूतादमुष्मात् प्रससार काकदूत–श्वानदूत–प्रभृतीनां शताधिकानां नवीनदूतकाव्यानां परम्परा।[1] दूतकाव्यं चानेन खरतर–याथार्थभूमिमारुरोह। पूर्वमुद्गरमध्यमुद्गरोत्तरमुद्गरेति खण्डत्रितयविभक्तमिदं काव्यं नव्यभारते परिव्याप्तं दम्भं पाखण्डं च मुद्गरप्रहारपुरस्सरं विखण्डयति। १४८ मन्दाक्रान्तासु विन्यस्तं काव्यमिदं प्रथमे च्छन्दसि एव भिन्नमुपोद्घातं

१– अस्यामेव परम्परायां नव्यै रचितानि बहूनि विडम्बनकाव्यानि, तथाहि–वीरभद्रमिश्रेण रघुवंशमुपजीव्य लघुवंशम्, रहसविहारिद्विवेदिना गीताद्वितीयाध्यायमुपजीव्य स्थित पदप्रज्ञोपनिषद् वा वेदान्तसारानुबन्धचतुष्टयमुजीव्याधिकारिनिरूपणं वा।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

विधत्ते– Digitized by Arya Samaj Foundation Chennai and eGangotri

किं मे पुत्रैर्गुणनिधिरयं तात एवैष पुत्रः
शून्यध्यानैस्तदहमधुना वर्तये ब्रह्मचर्यम्
कश्चिन्मूर्खश्चपलविधवास्नानपूतोदकेषु
स्वान्ते कुर्वन्निति समवसत् कामगिर्याश्रमेषु।।
अनन्तरं चोपचारचातुर्यमस्य मूर्खदेवस्य विवृतम्-
ग्रामोपान्ते तरुणविधवाः प्राप्तगन्धर्वबाधा
मूर्च्छामग्नाः सरभसमसावामृशन्नङ्गुलीभिः। (मुद्गर.–६)

राजनीतिनिरतानां भारतीयप्रजातन्त्रकलङ्कानां नेतृणां छद्म प्रवञ्चनां चेह विषयीकुर्वन् कविः देशद्रोहं विरुणद्धि–

नीतिव्याख्यासमितिषु तथा धर्मवार्तासदःसु
प्रायो नाट्येष्वथ शवखनिष्वाश्रमेषूद्भटानाम्।
व्यर्थं क्षिप्त्वा भरतवसुधाद्रव्यकोटीः स कीटो।
देशप्रेमोल्बणभणितिभिर्नाशयामास विद्याम्।।

(पूर्वमुद्गरे–१५)

विडम्बनाया भावः कामपि काष्ठां गतवान् मुद्गरदूते। मूर्खदेवस्य कपटसंन्यासं गतस्य विधवाभिः रमणं, चर्मकारादीनां समितीनां स्थापना, तस्य परममौर्ख्यपूरितांनामप्युक्तीनां जनसमाजे समादर इति सर्वमत्र सवैचित्र्यं चित्रितम्। विडम्बनया सह हास्यं समग्रे काव्ये सहजं विलुलितम्। मूर्खदेवः सरलस्वभावसम्पन्ना विधवा नारीरित्थं रञ्जयति–

आसं पूर्वं रजकभवने रासभः साधुवृत्ते
येषां प्रेष्ठा मम च विधवा रासभी सा सती वा।
चैत्ये श्वायं मम किल पिता सूकरी हन्त माते-
त्याद्यैर्जन्मान्तरसुचरितैर्नन्दयामास नारीः।।

(पूर्वमुद्गरे–२३)

सोयं मूर्खदेवः कदाचित् कस्यचिच्छिष्यस्य स्वप्ने काष्ठबाहुद्वयविशिष्टः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निशाकाले विष्णुरूपेण प्रकटीभूय ज्ञातः [illegible]मेव पूजामाप, कदाचिदर्थप्राप्तेरुपायान् व्याचक्षाणः पादुकाभ्यां ताडितः, कदाचित् प्राणायामेन गगनविहरणं स्वस्य प्रदर्शयन् भित्तिकास्थनागदन्तेन स्वमेखलामाबध्य मन्दालोके ननर्त सर्वविधपाखण्डप्रसक्तोऽपि पूजितः–

सर्वाशुद्धिप्रणयिहृदयो मद्यवार्धेरगस्त्य-
श्चाण्डालीनामधरमधुपो बद्धगर्धः कुसीदे।
जिह्मो भूयस्तरुणविधवाभ्रूणहत्यापराधी
धर्मव्याख्याचटुलरसनः पूज्यते स्मैष मूढः।। (तत्रैव–३०)

सोऽयं मूर्खदेवः स्वप्रियां रण्डां प्रति कदाचित् नग्नं मुद्गरदेवं दूतरूपेण प्रेषयन् कथं यात्रा निर्वाह्येत्युपदिशति–

विक्रीयैतत् पथिकनिकटे भूरि वित्तं च लब्ध्वा
प्राप्ते वाष्पानसि विश जवाच्छुल्कपत्रं विनैव।
स्थाने-स्थानेऽधिकृतपुरुषान् वीक्ष्य दूराच्छनैस्त्वं
तिष्ठे ब्रह्मच्छकटरचितावस्करागारमध्ये।। (मध्यमुद्गरे–८८)

अप्रतिमप्रतिभासपन्नोऽयं रामावतारशर्मा अष्टादशवर्षदेशीय एव धीरनैषधं नाम नाटकं निर्मिमाय। **मारुतिशतक-शम्भुशतक-कृष्णस्तबक-कल्पतरु**प्रभृतीनि भूयांसि काव्यान्यनेन प्रायशः १८९५ तमे खिस्ताब्दे विरचितानि, तदासौ एकविंशतिवर्ष एवायुषोऽवर्तत। मारुतिशतके नृत्यत्प्राया पदावली वर्णविन्यासवक्रता वैदग्धी च मनो हरति। लङ्कादहनमित्थं तत्र वर्णितम् –

हा मातस्तात हा हा प्रिय इह दयिते वत्स हा क्वासि यातो
हा दग्धो हा मृतोऽस्मि स्फुटति बत शिरो हन्त दैवं नृशंसम्।
इत्थं कोलाहलैर्यो रजनिचरपुरीं सम्भृतां दाहकाले
चक्रे सोऽयं कपिर्वः प्रदिशतु सततं सन्ततं सौख्यराशिम्।।

रामावतारशर्मणः लेखनीप्रवाहेण पारम्परिककाव्यबन्धः नव्यराष्ट्रवादधाराया–मवगाहनं व्यधत्त। एकतस्त्वयं कविः शम्भुशतकादिकाव्येषु भक्तिभावततिं तनोति–

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गौरीदोलीतिकाप्रसङ्गविगलद्भस्माङ्गरागोज्ज्वलं
ग्रीवाहालहलप्रभाच्छुरणया श्यामायितात्मप्रभम्।
मौलिस्थास्नु सुरापगातटवनीवानीरजालोपमं
चूडाचन्द्रमरीचिमण्डलमुमानाथस्य मथ्नात्वघम्।।

अपरतश्च **''अभिनवभारतम्''** इति काव्ये भारतेतिहासतरङ्गः देशान्तरीयेतिहासतरङ्गश्चेति तरङ्गद्वयविभक्तेऽसौ संस्कृतकवेः स्वदेशकालानुरूपं दायित्वं निर्वहति देशस्य विश्वस्य चैतिह्यं भवितव्यं मीमांसमानः। देशान्तरीयेतिवृत्ते अष्टादशवीचिषु रामावतारशर्मा ४२४ पद्येषु जवाहरलालनेहरूरिव दिङ्निदर्शनं प्रस्तौति मिश्ररोमादिगतवृत्तान्तस्य। वैदेशिकनाम्नां संस्कृतीकरणं विधाय संस्कृतस्य युगानुकूलं रूपं चात्र कविना प्रकटीकृतम्–अलिकचन्द्रः (अलेग्जैंडर), प्रलिम्पः (फिलिप) इत्यादिनामभिः।

कस्या अपि भाषायाः साहित्यस्य जीवनशक्तिं परिचाययति नवीनाः परिवर्तिता वा स्थितीरुपलक्ष्य नूतनशब्दानां निर्माणं समादानं सङ्ग्रहो वा, नव्यसाहित्यविधानां प्रचलनं, नवीनविषयाणां शैलीनां वाविष्कारः रामावतारशर्मणः विपुलवाङ्मये एतत् सर्व विलोक्यते। मुद्गरदूत एवानेन भूमण्डलस्य नवीनपरिवेशपरिचायकाः बहवः शब्दा इदम्प्रथमतया प्रयुक्ताः, यथा– अनृता (न्यूयार्क), स्थूलाभ्यूषः (लोफ), वाष्पयानस्थानम् (रेलवे स्टेशन), क्षारनीरम् (सोडा वाटर), शुल्कपत्रम् (टिकिट), व्यक्तोर्जान्ति (विक्टोरिया टर्मिनस), अशनशकटम् (रेलवेकार), सुबीजकुल्या (स्वेज केनाल), अजपुत्रा (इजिप्ट), सुफेनाः (स्पेन), मक्षिका (मेक्सिको), पवनशकटम् (मोटरकार), स्वनग्राहयन्त्रम् (ग्रामोफोन), मिश्रसिप्रा (मिसीसिपी) इत्येवमादयः। इतिहासलेखनं, वैज्ञानिकान् विषयानधिकृत्य निबन्धरचना संस्कृतगद्यस्य युगानुरूपो नवसंस्कारश्च रामावतारशर्मणोऽवदानं प्रगुणयन्ति। आधुनिकभारतस्य पृष्ठवर्तितां दयनीयां च दशामसौ सम्यक् सविश्लेषणं मीमांसते। विलिखत्यसौ स्वकलाकौमुद्या उपक्रमोल्लासे–

'किं करोतु वराकोऽयं बालजनः? क्षेत्राणि विक्रीय गुरुजनेन कलाकुमार (बी०ए०) पदं प्राप्तुं प्रवर्तितोऽयम्। नास्य गुरुभिः सकृदपि मनसि कृतम् उत्तीर्णेभ्य एतेभ्यः प्रतिमासं विंशतिमुद्राव्ययेन

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

अमूल्यस्वास्थ्यविनिमयेन च पठितवद्भ्यो न्यायाधिकरणेषु विद्यामन्दिरेषु च रिक्तं पदं प्रदास्यते न वा ? न तैः स्मृताः शतशो न्यायवादिनो (वकील) गात्रान्मक्षिकापसारणमात्रं कुर्वाणा न्यायालयेषु।

Digitized by Arya Samaj Foundation Chennai and eGangotri

(प्रकीर्णप्रबन्धाः, प्रथमखण्डः, पृ० १२०)

अर्वाक्तनविचारान्, नवीनसंसारे जायमानाभिनवानुपक्रमान् ज्ञान–विज्ञान क्षेत्रे नवाश्च गतीः शर्मा सन्धारयति, प्रतिपादयति परिचाययति च स्वलेखन्या। चिन्तनस्य प्रत्यग्रता भास्वरता चास्य साहित्ये सर्वत्र भासते। वस्तुतोऽयं वर्तमानकालिकसंस्कृतलेखने आधुनिकताया अग्रदूतः।

कवी रामावतारः महात्मनोः गान्धेरफ्रीकातः स्वदेशागमनात् प्रागेव विंशशतकस्यास्य प्रथमदशके भारतीयानां कृते सर्वधर्मसमभावस्य राष्ट्रैक्यस्य च सन्देशं स्वकाव्येन ददौ–

नराः सर्व एवैकमीशं भजन्ते
स ईशः परं नामभेदेन भिन्नः।
समुद्भासितो धर्म एतेन चैको
विचिन्त्येति को वर्ततां भेदवादे।।
कलिङ्गाङ्गवङ्गान्ध्रकद्राविडादीन्
उपाधीन् विहायैक्यमालम्ब्य भूयः।
अये भारतीयाः पुरेवात्मरूपं
लभध्वं यशश्चन्द्रशुभ्रं तनुध्वम्।।

भट्टमथुरानाथशास्त्री (१८८६–१६६४ ई०) समकालिकसंस्कृत–साहित्यस्याद्यतनत्वमसाधयत्। अनेन इतरभारतीयभाषाणां साहित्ये प्रचलिताः नवीना विधाः, नूतनानि च्छन्दांसि अभिनवाश्च विषया आधुनिकसंस्कृत रचनाया भूमाववतारिताः। कवित्त–छप्पय–घनाक्षरी–सोरठा–प्रभृति–ब्रजभाषाच्छन्दोभिः गजल–रुबाई–प्रभृति–पारसीककाव्यविधाभिश्चानेनेद–म्प्रथमतया संस्कृतसाहित्यसंसारः परिचायितः। रेडियोरूपक–ललितनिबन्ध लघुकथनिकादीनां नव्यविधानां संस्कृतसाहित्ये अयमेव सूत्रधारः। प्रेमचन्द्र–सदाकतहसनमण्टो–प्रभृतिभी रचितानां कथनिकानां तुलामधिरोहन्ति अस्य संस्कृतकथनिकाः। यथैव कथनिकासु तथैव मुक्तकेष्वपि कविरयं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारतीयसमाजस्य परिवर्तितं स्वरूपं निरूपयामास । भूतार्थकथने यथार्थचित्रणे च प्रभवति प्रतिभा एतदीया, हास्यविनोदेन नर्मालापेन च सचमत्कारमयं मिश्रयति उत्प्रासशैलीम् । सुकुमारभावसमुन्मीलने खरतरयथार्थसमुद्घाटने च समं लीलायते अस्य भारती । संस्कृतपण्डितानां पाखण्डं नव्यानां यूनां च कदाचारमधिकृत्यासौ समं जागरूकः निर्भीकश्च निन्दनीयविगर्हणे । तथाकथितानाधुनिककवीनधिकृत्य सत्यमयं लिलेख–

शब्दा न स्फुरन्ति रचनासु, नापि भाषा वशे
न पुनरशेषवृत्तबन्धे प्रभविष्यामः ।
दासा इव नानुयान्ति वाचमनुप्रासा अपि
भावमनायासादभिव्यक्तुं नोल्लसिष्यामः ।।
मञ्जुनाथ- मानसिकमोदोद्गारमेतं मञ्जु
कवितानिकेतं कृच्छ्रभावैर्भरयिष्यामः ।
प्रस्थयवयोग एव विकलं व्ययतु वचो
निर्विरोधवाचो वयं कवयो भविष्यामः ।।
जन्मजातमेतत्काव्यबीजमुपलब्धं न वै
विश्रब्धं न सिद्धकविसेवामाचरिष्यामः ।

अभिव्यक्तेरनाविलता सहजता च सर्वत्र विलसति मञ्जुनाथस्यास्य मञ्जु–गद्य–पद्यबन्धेषु । अयं सुकविः पारसीकोद्यानगजलवल्लरीं सरसायां भारतीयरसायामवारोपयत् । दिङ्मात्रमुदाह्रियते–

विलिखामि मानसवेदनां विसृजामि हन्त तदन्तिके
परमन्तरं परिशङ्कते स विलोकयिष्यति वा न वा ?
अपि यासि चित्त तदन्तिके तव सन्ति के सुहृदः सखे
निखिले स्थले कुटिलालके सरलो मिलिष्यति वा नवा ?
नवपल्लवा विलसन्ति संविकसन्ति ते कुसुमोत्कराः
मम भागधेयतरुः सखे सरसं फलिष्यति वा न वा?

नवीनविधासु नवीनभावेषु चानीयमानेषु शब्दा अपि नवनवा अवतरन्ति,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुरातनशब्दानां नवार्थेन सङ्ग्रहणमिति [illegible] भावनयानुभूयते। यथा उपरिलिखित उद्धरण एव **'अन्तर'** शब्दोऽन्तःकरणार्थे प्रयुक्तः, प्राचीनकाव्ये प्रायः अस्मिन्नर्थे नायं शब्दः प्रयुज्यते।[1]

पण्डिता क्षमादेवी (१८९०–१९५४ ई०) आधुनिकसंस्कृतकाव्ये राष्ट्र–भावनाया अग्रदौत्यं व्यदधात्। इयं **सत्याग्रहगीतोत्तरसत्याग्रहगीतास्वराजविजये**-तिमहाकाव्यत्रय्या निखिलं गान्धिचरितं स्वातन्त्र्यसङ्घर्षं च निश्चाकचक्ययापि समर्थया चित्रालङ्कृतिरहितयापि विषयवैविध्यविचित्रया सहजसरलया भाषया निरूपयामास। अस्याः कथामुक्तावल्यां सङ्कलितासु पञ्चदशकथासु गद्यबन्धाः विशिष्य चमत्कारपूर्णाः **कथापञ्चकम् ग्रामज्योतिरिति** पद्यबद्धकथनिकासङ्कलनयोराधुनिककथनिकायाः स्वरूपं सहजं विशदं च समुन्मीलति। **शङ्करजीवनाख्यानमिति** जीवनचरितात्मकं, **विचित्रपरिषद्यात्रेति** आत्मकथात्मकं लघुकाव्यं नवीनदृष्टिभङ्गीं विधाया अभिनवतां च पुरस्कुरुतः।

कविपण्डितो वेङ्कटरामराघवः (१९०८) विशदव्युत्पत्तिवैदुषीमण्डितैः स्वकीयैः प्रबन्धैः **'विद्वत्कवयः कवयः, केवलकवयस्तु केवलं कपय'** इत्युक्तिं स्मारयति। तत्र **मुत्तुस्वामिदीक्षितचरितं** महाकाव्यं सङ्गीतनाट्य–शिल्पकलादिज्ञानेन, दक्षिणभारतीयतीर्थनगरादिवर्णनेन भारतीयसंस्कृतेर्वैविध्यस्य समृद्धेश्च निदर्शनेन महीयते। पञ्चाशत्प्रायाणि लघुकाव्यानि कवेरस्य प्रतिभाया अतिव्यापकं फलकमुपस्थापयन्ति। क्वचित् योरोपयात्रायाः स्मृतयः (**अभ्रमभ्रममभ्रमाय**), क्वचिद् विश्वेतिहासस्यार्षदृशा निरूपणम् (**इतिहासजरद्धात्री वत्सश्च**), क्वचिद्दाम्पत्यभावना (**अयोगयोगः**) क्वचित् भावभरितानि स्तोत्राणि (**कामाक्षीमातृकास्तवः, मीनाक्षीसुप्रभातम्**) अपरत्र विविधाः सूक्तयः विपुलानि सुभाषितानि चास्य काव्यविश्वे विलसन्ति। स्वच्छन्दतावादस्य प्रभावोऽस्य मुक्तककाव्येषु सविशेषं प्रतिफलितः। आम्रवृक्षमसौ पृच्छति–

Gurukul Kangri Vishwavidyalaya HARDWAR

सहकारवनस्पते चिरात् त्वामभवं प्रष्टुमिदं समुत्सुत्कोऽहम्ः।
प्रतिवर्षमिमानि पाण्डुपत्राण्यवधूनोषि ददासि नूतनानि ॥

१– अमरकोशे नानार्थवर्गे उक्तम्–
अन्तरमवकाशावधिपरिधानान्तर्धिभेदतादर्थ्ये।
छिद्रात्मीयविनाबहिरवसरमध्येऽन्तरात्मनि च।। (अ०को० ३/३/१८७)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

किसलयानि मृदूनि मञ्जरीणामपि [illegible]ङ्कुला नवीनाः।

दिवसैस्त्रिभिरेव शुष्कमुण्डास्तव शाखाः इह पत्रलाः समृद्धाः।।

किमिदं तव कार्मणं यदक्ष्णोः पुरतश्छोटिकयेव नूत्नमुर्व्याम्।

प्रतिनिर्मितवानसि स्वमेवं किमिदं मर्म रसस्त्वयीह को वा।।

अन्यत्र च–

कादम्बिनीश्यामलितान् दिगन्तानुद्बुद्धपुष्पोत्पुलकान् कदम्बान्।

निध्यायतो निःशरणीकृतानि लुलन्ति मे वस्त्रवदङ्गकानि ।।

अत्र 'शुष्क मुण्डाः शाखाः' 'छोटिकया दधासीति' च नवीनैव कापि पदावली परिस्फुरति। राघवकाव्ये क्वचित् परुषकठोरा वस्तुवृत्तविशदीकरणचणाः शब्दाः, क्वचित् भावसान्द्रा कोमलकान्ता पदावली क्वचित् सर्वथेवानलङ्कृतं वस्तु, क्वचिच्च यमकानुप्रासविन्यासविलक्षणता विलोक्यते। मीनाक्षीसुप्रभाते कविराह–

कादम्बकाननविहारमयूरि मत्त-

कादम्बडम्बरविडम्बिपदाब्जलीले।

कादम्बरीमदरसारुणितालसाक्षि

कादम्बिनीकुचभरे तव सुप्रभातम्।।

नागार्जुनः (जनिः १६११ ई०) जानकीवल्लभशास्त्री (जनिः?) चेत्युभौ हिन्दीभाषायां स्वकवित्वेन प्रथितौ। परन्तु संस्कृतेऽप्याभ्यां नवोन्मेषविशिष्टा रचनाः प्रचुरं प्रणीताः। नागार्जुनस्य **'बादल को घिरते देखा है'** इति हिमा–लयवर्णनपरा कविता हिन्दीकाव्यपरम्परायामनेकश उद्ध्रियते। तथैव हिमालयवर्णनपराः कश्मीरसुषमासंवलिता अस्य संस्कृतश्लोका अपि सूक्ष्मपर्यवेक्षणं, कल्पनाया नावीन्यं सौन्दर्यपरीक्षणदक्षतां चास्य आविष्कुर्वन्ति। क्वचिदयं स्विद्यन्तीं वितस्तां विलोकयति, क्वचिद् हिमाचलकन्दरायां सुखं शयानां सौविध्यमयगार्हस्थ्यजुष्टां कान्तसान्निध्यतुष्टां मृडानीं निरूपयति।

जाड्यार्तानां सहस्रं दिशि दिशि प्रसृतं देवदारुद्रुमाणां

पाण्डुत्वग्वेष्टनान्तः शिथिलितवदना दैन्यमाप्ता वनानी।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्षुत्क्षामे शुष्ककण्ठे विमलसलिलगृहे निर्झराणां कुलेऽस्मिन्
शैत्याधिक्यप्रभावाद् विजडितगतिका स्विद्यतीयं वितस्ता।।

तथा च–

तारुण्यात् पूर्वमेव प्रथितविजयिनामग्रणीः कार्तिकेय-
स्तीक्ष्णप्रज्ञश्च विश्वे वितरति प्रतिभां बालको वारणास्यः[1]*।*
तातस्याधित्यकासु प्रमुदितवदना कान्तसान्निध्यतुष्टा
निद्रात्येषा मृडानी तुहिनवितितिभिः प्रावृतेवासमन्तात्।।

विनायक–कार्तिकेययोर्हिमकन्दुकक्रीडाया इदं दृश्यं देवतासु मानवीय–रागस्याविष्करणात् निसर्गजीवनेन कवेस्तदाकाराकारित्वात् तथैव मनोहारि–

नमामि हरपार्वतीप्रणयपद्मकिञ्जल्कजं
शिशुं शरवणोद्भवं गजमुखं च सिद्धिप्रदम्।
यदीयहिमकन्दुकैः शिखरकोटिसंस्पर्शिभिः
शतद्रुरपि धावनेषु शिथिलादरा दृश्यते ।।

एकतस्तु निसर्गरामणीयकनिरूपणपरा रम्या रचना अपरत ऐतिहासिक–द्वन्द्ववादविचारसरणिप्रभाविता दलितमानवतासङ्घर्षे सम्मिलिता वितन्यतेऽनेन कविना सुनयेन वाणी। लेनिनस्यावसानसमये लिखितं **'लेनिनशतकम्'** भावप्रवणतया महानायककृतित्वनिरूपणेन समुन्मेषनिदर्शनेन भाषाभिव्यक्तिप्रौढ्या च महीयते। दिङ्मात्रमुदाह्रियते–

स्थापितोऽसि शवाधान्यां स्फटिके पारदर्शिके।
शयानोऽपि हि जागर्षि भास्वरे तव लोचने ।।
अपि कौशेयनिचिताः स्वर्णवर्णाङ्किता अपि ।
सूक्तयस्तव सीदन्ति दुर्व्याख्याविषमूर्च्छिताः ।।
त्वामाजुहाव प्रथमं मानवी कर्मपद्धतिः ।
धूमायिता दार्शनिकैः पिच्छिला तु पुरोहितैः ।।

१– अत्र पादे च्छन्दोभङ्गः। **'तीक्ष्णप्रज्ञस्तु विश्वे वितरति च मतिम्'** इति कृते साधीयान् स्यात् पाठः। पद्यानीमानि 'नागार्जुन–चुनी हुई रचनाएं। इति सङ्ग्रहात् द्वितीयखण्डादुद्धृतानि।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गगनं गगनाकारं सागरः सागरोपमः ।

जार्जलेनिनयोर्युद्धं जार्जलेनिनयोरिव ।।

हिंसा प्रक्षालिता तद्वदहिंसापि विशोधिता ।

कूटनीतिस्तव स्फीता सा श्रिये चामृताय च।।

कविरयमवलोकयति यदेकस्तु भारते देशे निर्मीयन्ते इष्टिकादारुभिरभ्रंल्लिहानि भारतभवनानि, अपरतश्च दीनहीनजनताया जाग्रति आशकाङ्क्षास्वप्नसंवलितानि भारतभवनानि–

दक्षिणालाभतुष्टेन रोषाभिनयकारिणा ।

भूयो भूयः स्वतो दृष्टं भारतं भवनं मया ।।

दन्तेश्वरीसनाथे शबराध्युषिते वने गहने ।

दिव्यं महाविशालं भारतभवनं मया दृष्टम् ।।

कृषकाणां श्रमिकाणां यूनां क्षुत्क्षामकण्ठानाम् ।

पृष्ठे जठरे शिरसि च भारतभवनं मया दृष्टम्।।

इयमेव राष्ट्रियजीवनस्य द्वन्द्वात्मकता। इतो भारतभवनम्, ततो भारतभवनम्। तथापि विशेष उभयोः। पूंजीस्वामिभिरुत्थापितानि भवनानि विनाशनीयानीति कवेर्मनीषा वरीवर्ति। लेनिनशतके लेनिनस्याचरणमुदाहरन्नसाविदमेवाभिप्रैति–

दुःशासनाः प्रमथिताः कंसा नैर्वंश्यमापिताः।

पाटच्चराः कुवलयापीडा निर्वलयीकृताः ।।

पण्डितशिरोमणीनां कुले लब्धजनिर्जन्मजातकविर्जानकीवल्लभः षोडशवर्षदेशीय एव संस्कृते नव्यगीतरचनानैपुणीं निरुपमां निदर्शयामास। अस्य संस्कृतगीतिसङ्कलनं **'काकली'** नाम्ना १६३५ ई० वर्षे प्रकाश्यतां यातम्। अस्य सङ्कलनस्यानुशीलनेन ज्ञायते यद् यस्मिन् काले महाकविर्निरालाः हिन्दीभाषायां **'वीणावादिनि वर दे'** इति नव्यगीतिकाव्यं प्रणयति स्म तस्मिन्नेव काले जानकीवल्लभस्तादृशमेव स्वच्छन्दं छायावादच्छायाभूषितं वा गीतजातं संस्कृते विरचयति–

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निनादय नवीनामये वाणि, वीणाम्

मृदुं गाय गीतिं ललितनीतिलीनाम्।

वाण्या वीणा तु शाश्वतकालादेव झरीझङ्क्रियते, परन्तु कविरिदानीं नवीनवीणाया क्वणनमभिलषति।

अयं च नवयुगकविः कदाचित् अभ्रंल्लिंहान् प्रासादान् परित्यज्य तन्निर्मात्रीरिष्टिकाः सम्बोधयति–

इष्टिके किमिष्टं पश्यसि, नश्यति जीवनं समेषां,

त्वमिव त्वन्निर्मातॄणामपि सैव दशाभूत् तेषाम्।

किं मिलसि मृत्तिकायां त्वं गत्या जितशम्पाकम्पा

मृदि मिलितास्त्वन्निर्मातारस्त्वयि वर्धितानुकम्पाः।

क्वचिच्चायं मकरन्दनिन्दापरमिन्दिन्दिरं गर्हयति–

सरसि निविश्य मुखं सुखं चुचुम्बिथ नवरसं चषन् सन्

सम्मुखमसाम्प्रतं साम्प्रतमपि वृतानरविन्दम्।

विन्दन्नानन्दं परात् परैकमपि नवीनममन्दम्

इन्दिन्दिर, निन्दसि मकरन्दम्?

राधालास्यादीनि काव्यान्यस्य लालित्यं मसृणतां भावसान्द्रतां च निर्वहन्ति व्रजमाधुरीं मिश्रयन्ति संस्कृतभारत्याम्। तथा हि–

ज्योत्स्नास्नाते निशीथे किसलयशयिते मर्मरे स्निग्धसान्द्रे

चान्द्रं पीयूषमाचामति चटुलचलच्चञ्चुचञ्चच्चकोरे।

वेल्लत्कल्लोलमालाकलकलकलिते यामुने श्यामकूले

मन्दं मन्दं कदम्बं स्पृशति मधुमये माधवीये समीरे।।

किं किं किं किङ्किणीनां कणकणरणनं कङ्कणध्वानबन्धि

श्रावं श्रावं विरावं चलचरणमिलन्मञ्जुमञ्जीरजातम्।

लीलाशीलालि लोलत्करतलकलितोत्तालतालं सहास्यं

लास्यं श्रीराधिकायास्तिरयतु दुरितं मानसान्मानवानाम्।।

'बन्दीजीवनम्' इत्यप्रकाशिते खण्डकाव्ये सुकविः जानकीवल्लभः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

स्वातन्त्र्यसङ्ग्रामयज्ञदत्ताहुतीनां कारागारनिगडितानां राष्ट्रसेवकानां जीवनं
Digitized by Arya Samaj Foundation Chennai and eGangotri
सममर्दारणं निरूपयति।

ज्ञानोपाह्वो बच्चूलालोऽवस्थी (जनिः १९१८ ई०) स्वकाव्येषु अनितरसाधारणीं भावप्रवणतां संस्कृतभाषाया लक्ष्यवेधि सामर्थ्यं शब्दसौष्ठवम् अर्थगौरवं च प्रकटीकरोति। अस्य स्तोत्रकाव्येषु जीवनदृष्टिर्दार्शनिकचेतनाया गहनता च विलक्षणं लक्ष्यीक्रियते। मातृस्तवकः तत्र वात्सल्यस्य भक्तेः आत्मदैन्यस्य आत्मगौरवस्य च कामपि काष्ठां रोहति–

पतिप्राणे मातः क इव महिमानं तव नुयात्
पतिं स्वान्तःसारैः सह चिदणुनाशेन बिभृषे।
नवीकर्तुं कार्तस्वरमिव शरीरं प्रकुरुषे
परिष्कर्तुं कर्तुं जगति कृतकृत्यं विनयसे ।
निकायो धातूनां मसृणमसृणः पुत्रपदवीं
दधानो दम्पत्योः प्रणयनिलये कूजकपिकः।
व्यलीकव्यावृत्तो हृदयविभवः सम्भृतरसः
कुटुम्बप्रस्तारो नलिननिकुरम्बो घुसरितः ।।[१]

अन्योक्तिपरकाणि प्रतीकात्मकानि वा खण्डकाव्यानि भावसम्भृता रसमय्यो गजलगीतयश्च अवस्थिवर्याणां विशिष्टं काव्यात्मकमवदानं प्रमाणयन्ति। प्रतीकात्मक खण्डकाव्येषु **शुकवृत्तम्**[२], **दस्युशुनकीयम्**[३], **का गतिः**[४], **एकदन्तवृत्तम्**[५] इत्यादीनि परिकल्पनाया नवीनतां, कथाकौतुकं, वर्तमानदेशकालगतिं, कविजीवनदृष्टिं चिन्तनस्य मौलिकतां च रचनाकर्तुः सम्यक् प्रमाणीकुर्वन्ति। शुकवृत्ते कश्चन बालकः पञ्जरनिगडितं दीनं हीनं कञ्चन शुकं पञ्जरद्वारमुद्घाट्य मोचयति– इत्येतावन्मात्रं वृत्तं सूक्ष्ममपि व्यङ्ग्यार्थप्रणालिकया विराड्रूपतां प्रपन्नम्। सहजप्रसन्नपदावल्या कविरिह वेदान्तसम्मतया दिशा आत्म–जीव–देहानामन्तःसम्बन्धं समुन्मीलयति, परामृशति

१–५ : काव्यानीमानि प्राक् 'अर्वाचीनसंस्कृते' (१९८७ई.) किञ्च दूर्वापत्रिकायां प्रकाशितानि, सङ्गृहीतानि च तदनु अस्मत्सम्पादिते **'आयतिः'** (सागरम्, १९९१) –इति सङ्कलने।

५– अस्मत्सम्पादिताया **प्रख्यायाः** प्रथमे स्पन्दे खण्डकाव्यमिदं सङ्गृहीतम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

च स्वातन्त्र्यशक्तिम्–

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्याधेन कायपरवत्त्वमिह प्रणीत

वाक्पारतन्त्र्यमपि सम्प्रति पालकेन।

यस्मिन् द्वयीयमथ तस्य मनोऽन्यदीयं

स्वीयं किमस्ति हरये यदुपाहरामि।।

आत्मा स्वतन्त्र इति चेन्निगमा निराहु-

र्नाथस्य तस्य यदि नास्ति च नाथवत्ता।

विश्वस्त एव भव जीव मदीय तावत्

कारास्वपीह भगवानवतर्तरीति।।

इत्थं विचिन्तयत एव च कोऽपि बालो

लीलापरायणमनाः परिकूर्दमानः।

तत्पञ्जरं प्रति शनैः सहसोपयातो

द्वारं विपाट्य विजहास सपाणितालम्।।

दस्युशुनकीयम् इति काव्ये ग्रामशुनः सन्त्रासयन् पथिकानां कृते महदातङ्कभूतः इत्वरः कश्चन विक्रमैकधनः सारमेयः कस्यचिद् धनपतेर्गृहे लुण्ठनं विधाय तस्य गृहिण्या देहादाभूषणानि बलादवतारयतो दस्यून् सहसा आक्रम्य निरुणद्धि अन्ततश्च–

एकाक्षः कोऽपि कोऽपि त्वचि परिचलितः कश्चनोत्कृत्तकर्णः

कश्चिद् दन्तैश्च तीक्ष्णैरजनि निरधरः कोऽपि खञ्जत्वमीतः।

यातप्राया त्रियामेत्यपहृतमनसः प्लायितास्ते निरर्थाः

कश्चित्तत्रान्तराले सपदि बत शुनस्तस्य चिच्छेद शीर्षम्।

यावज्जीवं विदग्धः स्ववशविहरणः सिंहजीवं जिजीव

प्राप्ते काले निजेच्छाभ्युपगतमरणो भीष्ममारं ममार।

ग्रामे प्रापूजि तस्य प्रतिकृतिरनिशं ग्रामदेवप्रपूजं

गेहे गेहे सुकीर्तिर्हुतवहसुरभिप्राणसारं ससार।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

कवेर्बच्चूलालस्य गजलगीतयो रदीफ–काफियादीनां निर्दुष्टप्रयोगं Digitized by Arya Samaj Foundation Chennai and eGangotri पारसीककाव्यस्य तलावगाहित्वेऽपि संस्कृतनिष्ठत्वं नूतनाभिप्रायसन्निवेशं च पुरस्कुर्वन्ति। एतदधिकृत्य परस्तादिह विमर्शं विधास्यामः।

अनेकत्र कवेरस्य काव्येषु व्याकरणस्यासाधारणपाण्डित्यमत्यन्तजटिल दुरूहशब्दानां प्रयोगश्च अप्रयुक्तत्वक्लिष्टत्वादिदोषानाविर्भावयतः। मातृस्तवके यथा–

मुदा सध्रीचीना तरलसरला पालिविषये
प्रयोगे नीचीना निरुपधिविषूचीनखचना।
अपीचीनस्नेहा विरचितपराचीनवलया
प्रतीचीनाम्बायाः सुतवदनचुम्बा विजयते।।

अत्र सध्रीचीना, नीचीना, विषुचीनखचना, अपीचीना, पराचीना, प्रतीचीना–इत्येवमादयः शब्दा टीकामपेक्षन्ते। परन्त्वेतादृशशब्दानां नारिकेलत्वचं विदार्य यो रसगर्भनिर्भरः सारोऽवस्थिकाव्य उपलभ्यते स समकालिकसंस्कृत–साहित्ये अर्थगौरवस्य परमदुर्लभो निधिरस्ति। वस्तुविचारे तु परिधिरस्य रचना–संसारस्य सङ्कुचित एव, कवेरन्तर्जगतो भावसमृद्धिः चिन्तनस्य च गाम्भीर्यं तत्र महीयते।

कविजगन्नाथपाठकः (जनिः १६३४ई०) उमरखय्यामस्य काव्यं गाहं गाहं ततो वस्तुविशेषं कथनभङ्गीं चादायादायापि नवसंस्कारं तत्र कुर्वाणो विलक्षणं चमत्कारं वितरति। **कापिशायनी** (१६८०), **मृद्वीका** (१६८३), **पिपासा** (१६८६), **विच्छित्तिवातायनी** (१६६५) चेति काव्यसङ्कलनान्यस्य आधुनिकसंस्कृतसाहित्यवैभवं व्यञ्जन्ति। स्वकाव्यस्य प्रेरणास्रोत उमरख़य्यामस्य काव्यमस्तीति स्वयमसावूरीकरोति, परन्तु प्रेरणेयं कविना पाठकेन निजहृदय–विकस्वरभास्वरप्रणयेन सम्मेल्योन्मीलिता संस्कृतरचनासु नीलपरिधान–प्रच्छादनपुरस्सरम्। कापिशायन्याम् (पृ० ३७) अयमाह–

प्रणयो हृदि मेऽभवद् यदा सहजस्तस्य कृपाविशेषतः।
उमरस्य कवेः पथा तदा रचितेयं खलु कापिशायनी।।

रहस्यवादः, स्मृतीनामावर्तनविवर्तने, भावमार्दवं, शब्दानां श्लक्ष्णता च सविशेषं लसन्ति काव्ये एतदीये। अत्र पदावली शनैः शनैः मूकीभूता अनाहतं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

नादमिव भावुकचेतसि गुञ्जयति अनिर्वचनीयं च, किमपि प्रकटीकरोति वस्तुविशेषम्–

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्मृतिसद्मनि मेऽति जर्जरे क इहोपेत्य विनिर्गतः क्षणात्।
क्षणमेष तदीयनूपुरध्वनिमश्रौषमहो विनिद्रितः ।।

कविरयमेकाकी आत्मनः पद्धतिं काव्यमार्गे स्वयं निर्मिमीते। इतरैः कविभिः क्षुण्णं पन्थानमयं सुगमं गम्यमपि दूरात् परिहरति। खय्यामोच्छिष्टमस्य काव्यजगत् सर्वमित्यपि न मन्तव्यम्। तत्र सन्निहिता भारतीया दृष्टिः रहस्यबोधः उपनिषत्सारप्रवणा दार्शनिकी च चेतना खय्यामादपि तद् विशेषयति। अत आत्मनो वैलक्षण्यं कविरसौ स्वयमप्याह–

सरांसि सन्तु सकुशलानि ते तथा नद्यः।
मयोररीकृता जगति स्वयं पिपासेयम्।। (पिपासा, पृ० १)

प्रथमे पादे 'ते' इति सर्वनाम्नः द्वितीये च तथैव इयम् इत्यस्य प्रयोगोऽसाधारणत्वं काव्यस्यात्र प्रतिष्ठापयति। तेन सर्वसाधारण–जनस्वीकृतसुखानां परिहारः कवेरात्मनि भूम्नोऽन्वेषणं विशदीभवति।

मधुशाला–चषकादि प्रतीकजातं कविना जगन्नाथपाठकेन सौन्दर्यानुभूतिं परमतत्त्वं च गमयितुं प्रायोजि। तत्र क्षणिकानुभवेषु कालस्यानन्त्यं भासते–

चषका इह जीवने मया परिपीता अपि चूर्णिता अपि।
मदमेष बिभर्मि केवलं क्षणपीतस्य मधुस्मितस्य ते।।

तथा च–

अवलोक्य नताननाभवत् पुनरुन्नीय मुखं ददर्श माम्।
इयति क्षण एव जीवितं मरणं नन्वनुभूतवानहम्।।

इत्यत्र तु क्षणाशमात्र एव सकलजीवनविश्रान्तिर्निरूपिता। अन्यत्र तु–

कालो यास्यति वयमपि यास्यामो हन्त काल एतस्मिन्।
सकलैर्यातायातं पश्यति भगवान् महाकालः।।
याताः क्षण एतस्मिन् जनिता बहवो मृताश्च बहवः।
जन्ममरणयोस्तटयोर्वहति जीवनाख्यसरित्।।

(विच्छित्तिवातायनी, ५२५–२६)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इत्यत्र अनाद्यनन्तः सततप्रसक्तः शाश्वतिकः कालप्रवाहः कविनादर्शि।

जगन्नाथपाठकस्य समग्रे काव्यसाहित्ये प्रायः ते एव भावाः पुनः पुनरावर्तन्ते। अन्तर्मुखश्चायं कविः, स्थूलप्रपञ्चमनादृत्य स्वात्मनि विश्राम्यति। अत एव साहित्ये जीवनस्य जगतो नानावस्थानां मानवस्वभावगतवैचित्र्य–वैविध्ययोश्च ये निरूपणमभिलषन्ति, तेषां पाठकानां कृते एकरसता वैरस्यं वा पाठकस्य कवेः काव्यानुशीलनावसरे जायेत। मुक्तककविरयं, न प्रबन्धकविः। मुक्तकेषु चास्य गजलकाव्यानि रुबाईकाव्यानि नितरां मार्मिकानि।

कवी राजेन्द्रमिश्रः (जनिः १९४३ ई०) महाकाव्य खण्डकाव्य गीत–गजल मुक्तक– शतकाष्टक–एकांकिरूपक– नाटक– कथनिकाप्रभृति विविधविधासु विपुलसाहित्यविरचनया विशिष्य प्रथते। पारम्परिकरचनारीतेः परिष्कारः नवसर्जनासमुन्मेषश्च समं विलसतोऽस्य लेखन्याम्। नितरां विशालोऽस्य काव्यजगत्परिधिः। नितान्तं स्वात्मानुभूतिपरका रचनाः सामाजिकविषय–वस्तुप्रपञ्चाश्च सममेव ततो निस्सरन्ति। क्वचिदयं समकालिकीं राजनैतिकीं स्थितिं विषयीकरोति, क्वचित् पुराणं परामृशति। एकतस्तु–

मणिकर्णिकाघट्टे दिष्ट्या स्थितोऽहम्।
सत्याद् ऋते च सर्वैः स्निग्धैश्च्युतोऽहम्।।

इत्यैकान्तिको वैयक्तिकोऽनुभवोऽभिव्यक्तिं गच्छत्यस्य गीतिषु, अपरत्र शिवसदने रुचिरपदाया गौर्या अयं विलासः–

सजलजलदसमकुन्तलकेशे
सिन्दूराणि वहति गौरी शिवसदने।

भारविरिवावहितोऽयं कविर्नास्ति। पदनिवेशनिष्कम्पताया क्वचिदभावोऽस्य काव्येषु गद्यरचनासु वानुभूयते। यथा उपरि उदाहृते गीतांश एव कुन्तलकेश इति पदप्रयोगेऽधिकपदत्वशंका भवति।

लोकगीताश्रितानि काव्यानि अभिराजराजेन्द्रकवेः सविशेषं मनो हरन्ति। अस्य कथनिकाः आधुनिककथाविधानं सम्यक् संस्कृते प्रतिष्ठापयन्ति। **इक्षुगन्धा** (१९८६ ई०) **राङ्गडा** (१९९२ ई०) चेति कथनिकासङ्ग्रहद्वयी क्वचिदैतिहासिकीः क्वचित्सामाजिकीः क्वचिच्च प्रणयपरकाः कथाः पुरस्करोति। मध्यमवर्गीयं निम्नवर्गीयं च समाजं विशिष्यायं कथाकारो विषयीकरोति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

तत्रापि भारतीयपारिवारिकजीवनस्य चित्रणे पटुता श्लाघ्या। सौन्दर्यासक्तिः,
Digitized by Arya Samaj Foundation Chennai and eGangotri
तारुण्यस्योन्मादकता, दिवास्वप्नसदृश आशाबन्धः, नारीहृदयस्य समर्पणभावः, सौकुमार्यं च कथासु राजेन्द्रस्य दरीदृश्यते।

समकालिकसंस्कृतसाहित्यकारेषु कविरुपन्यासकारः कथनिकाकारश्च केशवचन्द्रदाशः प्रतिभाया प्रकृष्टतां प्रत्यग्रतां च सविशेषं प्रकटीकरोति। इदानीं यावदस्य त्रयोदश उपन्यासाः, षट् कवितासङ्ग्रहाः, एकः बालोपन्यासः, त्रयः कथनिकासङ्ग्रहाः, द्वौ च बालकथनिकासङ्ग्रहौ प्रकाश्यतां गताः। एतदतिरिक्तम् उत्कलभाषायाम् आङ्ग्लभाषायामपि लेखनी अस्य प्रसृता। कवेरस्य संस्कृतरचनाया अन्यैव प्रवृत्तिः, अन्यैव च रचना वचनावलीनाम्। अयं विश्वविद्यालये न्यायदर्शनमध्यापयति, अतः सर्वत्र रचनास्वस्य तार्किकसङ्गतिर्लक्ष्यीक्रियते।

तथाप्यस्य कविहृदयं सर्वासु रचनासु समं तरलितम्। सर्वत्र चास्य रचनासु पदशय्याया मसृणता, तदीयो विशिष्टो वक्रविन्यासः नूतनार्थसमुन्मीलनविचक्षणानां विलक्षणानां शब्दानां वाक्यांशानां पदावलीनां वा प्रयोगा दरीदृश्यन्ते। उपन्यासेषु कथनिकासु चानेनेदम्प्रथमतया चेतनाप्रवाहशैली (स्ट्रीम आफ कांशसनेस) संस्कृते प्रायोजि। सर्वथान्तर्मुखोऽयं कविः। कथनकिासु उपन्यासेष्वपि चास्य पात्राणि यथा मनोजगति विचरन्ति न तथा व्यावहारिके स्थूलजगति। आधुनिकयुग गत संशय–सन्त्रास–विघटन विसङ्गतीनां सविशेषं निदर्शनमस्य रचनाः प्रस्तुवन्ति।

काव्येषु मुक्तं छन्द एवायं स्वीकुरुते। तत्रापि भावबोधः पारम्परिकसंस्कृत काव्यदृष्ट्या भिन्नः। परम्पराधुनिकतयोर्द्वन्द्वः, महानगरजीवनम्, पुरातनपावन–जीवनस्मृतयः जटिल–संश्लिष्टबिम्ब– सङ्कुलतयास्य काव्येषु विवर्तिताः। कविरयं स्वयमेव स्वकाव्ययात्राम् असङ्गतौ सङ्गतेरन्वेषम् इति परिभाषते (ईशा, १९९१, भूमिका)। जीवनस्य रिक्ततायाः व्यर्थतायाश्च बोधो बहुशोऽस्य काव्येषु जागर्ति।

जीवनं तु तथापि वरेण्यमेव।
निधिभवनस्य
अलिन्दे यथा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

श्रूयते भौतिकतास्वरः
Digitized by Arya Samaj Foundation Chennai and eGangotri
विक्षिप्तदीनतासु च

चीत्करोति

शैलकल्पक्षपा

कमहं श्रावयिष्यामि

प्रसूतिकाव्यथां मम? (ईशा, पृ० ४)

आधुनिक्या अस्तित्ववाद–दर्शनधारायाः प्रभावोऽत्र परिस्फुटतीति वक्तुं शक्यते। न तथापि कविः केशवः अस्तित्ववादमविकलमूरीकुरुते। औपनिषदिकं दर्शनमेव अस्मदनूचानानां तदीयकविचेतना आत्मसात्कृत्य विजृम्भते। निक्षिप्तकन्दुकवदसौ न समुच्छलनमधःपतनं च विधत्ते, अपितु अनन्ते स्वीयं सीमितमस्तित्वं मिमिलिषति–

नाहं निक्षिप्तकन्दुकः

प्रत्यागमिष्यामि

भूतलं संस्पृश्य

परमेको मिमिलिषुः

आषाढस्य बिन्दुः। (तत्रैव, पृ० १)

अन्तर्जगतो जटिलभावसंवेगस्याभिव्यक्तये कविरयं सर्वथा अस्पृष्टबिम्बविधानं नूतनोपमानजालं च चित्रोपमैः पदैरङ्कयति। देहः जडः। चैतन्यं तस्मात् पृथग्भूतम्। अनुभवममुं साकारयत्ययमनयोपमया–

अनभिज्ञशरीरतो मम

मनो विगलति

यथा कश्चिद् वयस्कप्रणवः

वृत्तित्यक्तब्राह्मणस्य मुखात्। (अलका, पृ० ८)

प्राक्तना अनुभवा एतादृशकाव्ये विपरिवर्तिताः विपर्यासं वा गमिताः प्रतीयन्ते। परं तेभ्य एव नवयुगकवेरनुभवसंसारः भग्नावशेषतां गतेभ्यो विनिर्मीयते। कविः स्वयमेव स्वपथं निर्मिमीते। नात्र मेघो, न वा दौत्यम्। कविरेव प्रभुश्च, किङ्करश्च, दूतश्च, दौत्यकारकश्च!

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

मेघकथां न पृच्छ माम्
Digitized by Arya Samaj Foundation Chennai and eGangotri
अहं हि स्वयं दूतो मम नगरस्य

अहं च स्वयं प्रभुः, न कस्य किङ्करः। (तत्रैव, पृ० ४६)

कविरिह समस्तमपि जगदात्मन्येव लयं गमयति। आत्मानप्यसौ आत्मन एव पृथक्कृत्य पश्यति। तस्यैव चैतन्यस्यैकांशोऽपरमंशं 'त्वम्' इति पदेन सम्बोधयन् कवित्वेन प्रवर्तते। सम्बोधनस्य वैशिष्ट्यं चैतन्यस्यासीमताया अनुभवश्च केशवकाव्ये विशिष्टतयानुभूयते। अत्र अवैखरीलीलामालिकायां नितरां निमज्जति संसारः, आभासते च भूमा–

संसारो निमज्जति स्वयं

अवैखरीलीलामालिकासु

हास्यं यथाचुम्बिष्यदधरे

त्वमवभाससे यदा। (तत्रैव, पृ० २)

केशवस्य कविमनः स्वान्तर्जगतो नीरवायामेकान्तभूमौ अवस्थितं द्रष्टेव जगदवलोकयति। अयं साक्षीभावः दार्शनिकचेतनया सङ्गत्य तदीयोपन्यासेषु समुन्मीलति। असङ्गतीनां चक्रव्यूहे निपतितानि पात्राणि तत्र आत्मन्यात्मानमवलोकयन्ति, सङ्गतिं च गवेषयन्ति। महानगरजीवनं, ग्रामजीवनं, परम्पराः, आधुनिकता, शाश्वता आदर्शाः, नवयुगगताः संशया विकल्पाश्च सर्वमेतत् अलातचक्रप्रतिमं प्रत्यक्षतां नीयते केशवस्योपन्याससाहित्ये। प्रत्येकम् उपन्यासे कश्चन केन्द्रिय–विचारो जागर्ति। यथा **शशिरेखायाम्** (१९६४) परम्पराधुनिकतयोः द्वन्द्वः अन्तर्वस्तुतया ओतश्च प्रोतश्च। **'अञ्जलि'** रित्युपन्यासः (१९९०) दाम्पत्ये आधुनिकमहानगरजीवने च हृदयनैर्मल्यं गवेषयति। **मधुयानम्** संसार–निर्वाणयोः हीनमहायानयोः रूढधर्म–कर्मकाण्डयोः पृथग्भूतं तृतीयं पन्थानमन्वेषयति। **निकषा** (१९८६) जिजीविषाया जीवनस्य चान्तरं परामृशति। सर्वेष्वस्योपन्यासेषु सांस्कृतिकी दार्शनिकी च दृष्टिः परिपक्वतया प्रकाशते। वृत्तगन्धानां चूर्णपदानां च गद्यखण्डानां बन्धाः समुच्छलन्निर्झरिणीप्रवाहतुल्याः क्वचिद् विशन्ति विचारकुल्याम्, क्वचित् सङ्घट्टन्ते संशय–द्वन्द्व–निवह–पाषाणप्रत्यूहैः। वक्रोक्तिभङ्गानामावर्ता विवर्ताश्च सर्वत्र सङ्कुलयन्ति तेषां गतिम्। दिङ्मात्रमुदाह्रियते–

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रकाशस्वरूपे दिवसो विषयवशः। अर्जनलोभने कर्मनिर्मन्थः श्रमविरसः। उत्कोचरचनायां कार्यालयपुस्तिका मसीविकला। ईर्ष्याविषमे परस्परपथरोधिनी कर्मशाला। वञ्चनावाञ्छातले चतुरा विपणी रजस्वला।

(ऋतम्, १९८८, पृ० ६८)

नदी झरीयति। झरी च नदी भवति। स्रोतस्तु यथा तथा। उपचये श्रमति सहस्रधारा। अपचयेऽपि तथैव श्रीधारा। वहने क्षालनप्लावनयोरद्वैतप्रतीतिः। परं नदीयं न कदाचित् प्लावयति। केवलं क्षालयति प्लावयति। इयं हि चेतनांनदी।

(तत्रैव, ५६.६०)

पात्राणामाभ्यन्तरजगत ऊहोपोह–तर्कवितर्क– विमर्शपरामर्शादिचित्रणे कविरयमतीव पटुः। तदर्थं च भाषाया असाधारणीं नैपुणीं वाचां परिस्पदं प्रतिभाप्रसूतं पदावलीनामनुपमां स्फीतिं च प्रकटीकुरुते। तद्यथा–

अर्धशेषमार्गेऽस्मिन् उभौ संचरतः। श्रेष्ठिपरिपाटीषु शोभते शीलप्रज्ञः। नीजाञ्जनां निकटे लब्ध्वा आत्मानं बहु मन्यते। सर्वदा मधुवाता ऋतायते। मधु क्षरति दिवसः। मधु सिंचति रजनी। मधु संचिनोति सांध्योऽयं समयः। नीलाञ्जना अस्ति। सः अस्ति। मार्गः अस्ति। संसारः वर्तते। मधु विन्दते। सः अधुना नास्ति। भविष्ये वर्तते। भविष्यते नास्ति अतीते वर्तते। सः अस्ति। सोऽपि नास्ति। नीलाञ्जना अस्ति। नीलाञ्जना अपि नास्ति। इत्थं तस्य मानसे भावनाः उत्तरङ्गाः- अयमेव मार्गः स्यात्। तस्य गृहमत्र भूयात्। स च गृहस्थो भूयात्। नीलाञ्जना तस्य भार्या भूयात्। सर्व विद्येत। (पृ० २१

दहनं साधारणीकृत्य रात्रिः तया व्यतीता। विषयो विमृष्टः। विवादो विचारितः। समाधानम् अन्विष्टम्। आत्मा अवबुद्धः। उपायः चिन्तितः। प कालधारे सर्वमद्य शिथिलम्। सर्वं च विफलम्। बहु अवसानम्। अनेकं च अवसन्नम्।

अद्यत्वे तथापि तस्याः पादकदम्बे चपलता आपेक्षिकी। वचनविन्या स्नेहलीला मौखिकी। उत्तीर्णवयसि अपि पूर्वरङ्गो न लघीयान्। विभवो कनीयान्। अनुभवो न ज्यायान् प्रेयसी पुनश्च प्रतीक्षा। परं निवेदनस्य सम तिरोहितः। अभिमाने विषयो विषाक्तः।

(पृ० ४६)

नवोदितेषु कविषु सर्वथा अप्रचलिते अक्षुण्णे च पथि प्रचल

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri
हर्षदेवमाधवः। पारम्परिकसंस्कृतकाव्यरचनायाः सर्वथा विभिद्यतेऽस्य रीतिः। अपरिचितप्राया भाषासरणिस्तत्र समुदेति। अतियथार्थवादः, विक्षोभः, विद्रोहः, एकबिम्बात्मकं काव्यवर्त्म, प्रतीकानां सर्वथा नावीन्यं च विशेषयन्ति माधवीयं काव्यसंसारम्। अद्यावधि अस्य सप्त काव्यसङ्कलनानि प्रकाश्यतां गतानि, तद्यथा– **रथ्यासु जम्बूवर्णानाम् शिराणाम्, अलकनन्दा** (१९९०), **शब्दानां निर्मक्षिकेषु ध्वंसावशेषेषु** (१९९३), **मृगया** (१९९३), **बृहन्नला** (१९९५), **लावारसस्निग्धाः स्वप्नमयाः पर्वताः** (१९९६), **आसीच्च मे मनसि** (१९९६)।

माधव–काव्ये प्रायशः वैदेशिकसाहित्यसन्दर्भाः, योरोपजीवनम्, अभारतीयानां प्रतीकानां बिम्बानां वा सन्ततिः पारम्परिकसंस्कृतकाव्यभावकानां कृते न स्वदेत। आधुनिकप्रौद्योगिक्याः, यान्त्रिकसभ्यतायाः विज्ञानस्य च प्रसङ्गानसौ कविः संस्कृतकाव्ये विलक्षणमवतारयति। अस्य कविताया अप्रस्तुतविधानं सर्वथा अभिनवं भासते, विजातीयमिव प्रतिभासेत पण्डितानां कृते।

अलकनन्दे कुत्र त्वमसि?
मम रेडियोतरङ्गदीर्घतायाः
प्रत्युत्तरो नास्ति
प्रेम्णो गणकयन्त्रे
किं ते मनोऽस्ति
एण्टीमैटरनिर्मितम्?

(अलकनन्दा, पृ० १८)

रूमानियादेशे
चर्चप्रार्थनाकक्षे
लेटिनरुमानियनमन्त्रोच्चारणेन
पापानां स्वीकारं कुर्याम्?
बुखारेष्टे वा
कांस्टण्टिन ब्रार्कुसीशिल्पिनः शिल्पे
पश्येयं नव रूपम्? (तत्रैव, पृ० ३२)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

योरोपीयसभ्यताया ध्वंसावशेषाणां, महायुद्धानां विभीषिकायाः विश्वमानवताया नवीनस्वप्नानामाकाङ्क्षाणां च दुर्लभः साक्षात्कारो भवति माधवीये काव्ये। एतदीयकाव्यस्य जटिलप्रतीकजालजम्बाल आहिण्डमानः पाठकः कदाचित्– सर्वमेतत् कवेः स्वानुभूतमुत इतिहासभूगोलग्रन्थेभ्यो निस्सार्य निस्सार्य काव्यव्याजेन विन्यस्तम्– इत्यपि शङ्केत। परन्तु माधवीयकाव्यस्य गहना संवेदना अनुभूतिप्रवणता शङ्कापिशाचीमिमां निरस्यति। काव्यमिदं भिन्नमेव यथार्थबोधं देशकालं वस्तु च प्रतिष्ठापयति। आधुनिकभाषाणां नव्यरचनाया विच्छित्तिः अत्र नवीनं वर्णविन्यासं पद्धतिं च विरचयति। सौन्दर्यप्रणयी विद्यते कविर्माधवः, परन्तु तदीयकाव्यस्य सौन्दर्यबोधो न कमल–किसलय– चातक –मलयानिलादि–पारम्परिकप्रतीकजातमुपजीवति।

अलकनन्दे!
मयि स्पन्दते
विषुवियसलावारसः
त्वयि वेनिसनगरजलम्।

एतादृशस्य अप्रस्तुतविधानस्य कृते ये पाठका न प्रस्तुताः, तेषां कृते काममिह न स्यात् सौन्दर्यानुभूतिः, परन्तु विषुवियसज्वालमुखस्य विकरालतां, वेनिसनगरस्य रमणीयतां च ये जानन्ति तेषां कृते तु हृद्यनिरवद्यकमनीयमिदं वस्तु।

नास्ति अविषयः कवितायाः। आनन्दवर्धन आह–

प्रतायन्तां वाचो नमितविविधार्थामृतरसा
न सादः कर्तव्यः कविभिरनवद्ये स्वविषये।

निस्सीमं वर्तते अस्माकमिदं व्यावहारिकं जगत्। ततोऽपि सीमातिगतरं वरीवर्ति मनोलोकः। ये कवयः पूर्वकविभिरस्पृष्टानपि विषयानादाय काव्यं सरसं विदधति, अत्यन्तं सामान्या अपि विषयाः तेषां कल्पनाया स्पर्शमवाप्य असाधारणतां स्वीयामुन्मीलयन्ति। पादौ हस्तौ चाधिकृत्य माधवो विरचयतीत्थं काव्यम्–

स्वच्छायाशकटं कर्षतः
पदबलीवर्दौ

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

घटिकायन्त्रकण्टकौ भूत्वा

चलतः मम चरणौ। (अलकनन्दा, पृ० ६६)

तथा च–

ध्रुवरसदृशौ हस्तौ स्तः

मम शरीरस्य

ऊषरभुवि

अयं हस्तोऽस्ति अग्निः

हस्ताय स्वाहा

अत्र स्वच्छायाया शकटत्वं पादयोश्च बलीवर्दत्वं देहस्य चेतनायाश्च अन्तःसम्बधं नूत्नतया व्याचष्ट। इत्थमयं कविः आभ्यन्तरं लोकं बाह्यं च जगत् पारस्परिकया क्वचिन्मीमांसमानो नूतनद्वाराणि काव्यप्रासादे समुद्घाटयति।

तदित्थं केषाञ्चनार्वाक्तनसंस्कृतसत्कवीनां कर्तृत्वविचारेण समकालिक–संस्कृतसाहित्यस्य काश्चन विशिष्टा प्रवृत्तयः प्रस्फुटन्ति, याः पारम्परिकसंस्कृत–काव्यधाराया अस्याश्च नव्यसंस्कृतरचनायाः पारस्परिकमन्तरं प्रस्थानभेदं वा सूचयन्ति। तद्यथा–

१. भारतदेशस्य भूगोलिकं राजनैतिकं नवीनस्वरूपं लक्ष्यीकृत्य राष्ट्रियसंहतेर्दाढ्याय जागरिता राष्ट्रभावना।

२. नवीनमार्थिकतत्रं शोषणतन्त्रं प्रति अवधानवती समाजचेतना।

३. उत्प्रासस्य विडम्बनायाश्च भावः।

४. कथनिकोपन्यास–शिजो–ताङ्का–हायकू–सानेट– गजल– –रुबाई नभोवाणीरूपक–ललितनिबन्ध–नव्यगीतप्रभृतीनां प्रचारः।

एतासां प्रवृत्तीनां पृथक्–पृथक् विचारे महान् विस्तरो जायेत,अत उद्देश्यमात्रेणैवेह विरमामि।

वस्तुतः प्रतिवर्षं प्रचीयते संख्याऽर्वाचीनसंस्कृतकाव्यप्रकाशनानाम्, विस्तारं च गच्छन्ती गोचरीभवति नव्यसंस्कृतरचनाया आयतिः, विस्तृतिं यात्यस्या विषयपरिधिः। अयमपरः सन्तोषावहो विषयो यदस्य युगस्य केचन महाकवयः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

काव्यप्रकाशनपराङ्मुखा ये आसन्, तेषामपि काव्यानि सद्य एवेदम्प्रथमतया प्राकाश्यमागतानि। तद्यथा श्रीनिवासरथस्य **'तदेव गगनं सैव धरा'** यथा वा अवस्थिनो बच्चूलालस्य **'प्रतानिनी'**। अस्मिन्नेव वर्षे देववाणी– परिषदा नवोदितस्य सम्भावनाशीलस्य जनार्दनप्रसादमणेः **'निस्यन्दिनी'**, प्रौढस्य इच्छारामद्विवेदिनः **'सत्प्रेरणानाटकम्'** च प्रकटीकृते। राधावल्लभस्यापि नवीनं रागकाव्यं **'गीतधीवरम्'** अभिराजराजेन्द्रमिश्रस्य च **'नाट्यसप्तपदं'** सद्यः प्रकाशितम्।

इत्थं तैस्तैर्भणितिनिपुणैर्नीयमानं प्रतिष्ठां
नानाशीलैः कविभिरिह यत् पण्डितैः शंस्यमानम्।
दृश्यैः श्रव्यैरनुगतमिदं चोक्तिभेदप्रभेदै-
रर्वाचीनं जयति रचितं संस्कृते काव्यजातम्।

८.६.१९६ ई०
डा० हरिसिंह गौर विश्वविद्यालयः,
सागरः (म.प्र.)

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

देशवर्णनम्

डा० देवनारायणझा
उपाचार्यः, स्ना० साहित्य–विभागः
कामेश्वरसिंहदरभङ्गासंस्कृतवि०वि०, दरभङ्गा

देशो यातु रसातलं न हृदये चिन्तालवो विद्यते
कार्यं मानधना धनार्चितजनाः कुर्वन्त्यलीकं मुधा।
धृत्वा शुभ्रसुवासितञ्च वसनं भाषां सुधासन्निभाम्
लोके राजपदं सदा सुललितं सम्प्राप्य मोदान्विताः ।।१।।

रम्या भारतभूरियं सुविपुला सौभाग्यशान्तिप्रदा
भूत्या रम्यकलान्विता सुविदिता मोक्षप्रदा सर्वदा।
तस्या गौरवसौख्यमानहरणे गर्वं विधत्ते जनः
नो जाने कथमद्य देशदलने कोऽयं विधेः प्रक्रमः ।।२।।

सर्वे स्वार्थपरायणाः हि मनुजाः लुण्ठन्ति देशं मुदा
नो खिन्नाश्च भवन्ति हन्त कुटिला नो लज्जिताः साम्प्रतम्।
स्वच्छन्दं बहुरोषदोषभरितं स्वान्तं वहन्तश्च ते
मिथ्यामानमदान्धिताः कथमसौ देशद्रुहो भारते ।।३।।

दुष्टा मोहपरायणाः परभृताः संसारसंहारकाः
नेतारः सुलभा सदा प्रतिपदं कौटिल्यभाजोऽधुना।
देशं ते च रसातले कुमतयो दुष्टा नयन्तः सखे!
वार्याः केन पथा दुरन्तचरिताः तन्नैव जानीमहे ।।४।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कार्ये साधुविगर्हिते भुवि सदा वीरैरकार्ये मुहुः
रक्ता मानवशोषणे च सततं भक्ता न देशस्य ते।
तैरेवाद्य विनाशितश्च महिमा तद्गौरवं पातितं
सत्यञ्चाद्य जनैकता विघटिता त्राता प्रभुः केवलम् ।।५।।

बन्धो! नैव विभाति सौख्यकलितं राष्ट्रं मुदं धास्यति
सर्वत्रैव कुमार्गलाभलसिता लोकाः प्रसन्नाननाः।
राज्ये नीतिविदो मलीमसहृदः मर्मच्छिदो वञ्चकाः
संलग्नाः धनलुण्ठने प्रतिदिनं शान्तिः कथं स्थास्यति ।।६।।

लोके भेदधियश्च हन्त कुटिला द्वेषं विषं मानसे
दत्त्वा स्वार्थहिताय नित्यमधुना संमूर्च्छयन्तो जनान्।
कोशं चात्मविवृद्धये प्रतिदिनं संसेवमानाः सखे!
नो जाने विषमेऽधुना च समये सौख्यं भवेद् भारते ।।७।।

सर्वे कर्म सुदुष्करं विदधते स्वार्थाय ये सर्वदा
लोकाचारविगर्हितश्च बहुधा न्यायादपेतः सदा।
सौभाग्यात् कपटाच्च शासनपदं प्राप्य प्रभावान्विता-
स्ते द्वेषान्धितमानसाश्च जनता सौख्यं विदध्युः कथम् ।।८।।

संसारे बहवो बुधाश्च कुशला देशस्य सेवाविधौ
हित्वा स्वीयसुखं परार्थघटका आसन् पुरा भारते।
ये राष्ट्रस्य विवर्धने प्रमुदिताः प्राणान् ददुर्निस्पृहम्
देशः सम्प्रति तादृशैर्नरवरैर्हीनो विपन्नः सखे! ।।९।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वन्द्यतां कापि सा शासनासन्दिका!

रमाकान्त शुक्लः
आर० ६ वाणी विहार, नयी दिल्ली–११००५६

जन्मजन्मान्तरीयं स्वकीयं परं वैरभावं परित्यज्य यस्या वशात्।
एकतां यान्ति नेतार एकक्षणे वन्द्यतां काऽपि सा शासनासन्दिका।।
'वर्तमानार्थनीतिः परित्यज्यताम्' नैकशो यैरिदं वाक्यमुद्घोषितम्।
तेऽपि यल्लीलया तां भणन्त्युत्तमां वन्द्यतां काऽपि सा शासनासन्दिका।।
यां विधातुं करस्थां न किं किं कृतं चातुरीभ्राजितैर्नेतृवर्यब्रुवैः।
यां समासाद्य विस्मर्यते तैर्जनो वन्द्यतां काऽपि सा शासनासन्दिका।।
लक्षकोट्यर्बुदानामहो वञ्चनं शान्तभावेन यां प्राप्य कर्तुं क्षमम्।
यां श्रितैश्छन्ददात्री प्रजा पीड्यते वन्द्यतां काऽपि सा शासनासन्दिका।।
दूषणोद्घोषणं सद्गुणानां चये सद्गुणोद्घोषणं दुर्गुणानां चये।
यत्प्रभावाद्विधातुं सुशक्यं भवेद् वन्द्यतां काऽपि सा शासनासन्दिका।।
वञ्चनं मित्रघातस्तथा दस्युता निस्त्रपत्वं कृतघ्नत्वमित्यादयः
दुर्गुणाः वन्द्यतां यान्ति सद्यो यया वन्द्यतां कापि सा शासना सन्दिका।।
धर्मकामार्थमोक्षोपदेशाकराः सर्वविद्याचणाः सत्कलाचुञ्चवः।
अक्षरज्ञानशून्या अपि स्युर्यया वन्द्यतां काऽपि सा शासनासन्दिका।।
देशसेवां विधातुं य आयान्त्यहो तेऽन्यथाभावमाप्ता न किं कुर्वते।
यामधिष्ठातुकामा अधिष्ठाय वा वन्द्यतां काऽपि सा शासनासन्दिका।।
यं स्वतन्त्रं विधातुं हुतं जीवनं देशभक्तैरसंख्यैर्विलम्बं विना।
तस्य देशस्य चिन्ताऽपि हेया यया वन्द्यतां काऽपि सा शासनासन्दिका।।
पण्डितैर्योद्धृभिर्वाणिजैः कार्मिकैः सर्वकैरेव याद्यत्व आराध्यते।
सर्वसौख्यप्रदात्री समेषां नृणां वन्द्यतां काऽपि सा शासनासन्दिका।।
केनचिद् दृश्यतामस्मदीया दशा स्थापिता मूर्ध्नि येऽस्माभिरुत्साहिभिः।
हन्त! तैरेव वञ्च्यामहे यद्वशात् वन्द्यतां काऽपि सा शासनासन्दिका।।

(रचनाकालः जूनमासः १९९६)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मातः दुर्गे!

डाक्टर निरञ्जन दाशः
संस्कृत–शिक्षकः,
कमगाँ सरकारी हाईस्कूल,
स्था/पो० कमगाँ (KAMGAON)
वाया–वरडोल, जि०–वरगड़, ओड़िशा, पिन–768038

दुष्टाः पिशाचसदृशाः करुणाविहीनाः
घृण्या जनास्तु भुवि भद्रमुखाः प्रसिद्धाः ।
छिन्दन्ति तेखिलकृतिं कृतिनां जनानाम्,
शान्ता कथं त्वमधुना भव भीमरूपा ।।
दुर्नीतिशास्त्रनिपुणा विचरन्ति सुस्थाः
रक्तं धनं जनगणस्य च शोषयन्ति ।
दृष्ट्वाऽपकर्म निरतं भुवि दुर्नराणाम्
शान्ता कथं त्वमधुना भव भीमरूपा ।।
सन्त्रासवादभयहारिणि! हे कराले!
यस्याऽसुरस्य हतये त्वमिहाऽऽविरासीः ।
व्याप्तो मुहुः स दनुजो बहुभिः पृथिव्यां
शान्ता कथं त्वमधुना भव भीमरूपा ।।
संसारसारविषयं बहुलं विनम्य,
संसारजीवपरमां प्रकृतिं विदूष्य ।
अद्यापि ते वरजना यश आप्नुवन्ति,
शान्ता कथं त्वमधुना भव भीमरूपा ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सर्वे सन्ति मदीयाः

डा० शिवशरणशर्मा द्विवेदी
५१–विनयनगर भाग–१
जेलमार्गः, ग्वालियर, म० प्र०
पिन–४७४०१२

लोके सर्वे सन्ति मदीयाः
अनुजाः केचित् केचिदग्रजा, नहि केचित् परकीयाः।

१

पाश्चात्त्याः केचित् पौरस्त्याः तथा केचिदौदीच्याः
दाक्षिणात्य - मध्यस्थाः सर्वे प्रेम्णा स्वीकरणीयाः।

२

विविधाः सन्ति जगति हरिभक्ताः, तथा नास्तिकाः केचित्
रुचि - भेदेनैतेन किन्तु नहि केऽपि तिरस्करणीयाः।

३

दक्षिण - वाम - मध्यमार्गीयाः केचिदन्यमार्गीयाः
नहि वैरिणो यतो हि सन्ति सर्वे सेवामार्गीयाः।

४

वनवासिनः सन्तु दलिता वा धनहीना ग्रामीणाः
सर्वे यतो हरेः सन्ततयः, सन्ति परममहनीयाः।

५

श्रेष्ठा मन्यन्ते भुवि केचित् तथा केचिदश्रेष्ठाः
प्रेष्ठास्ते सर्वेऽपि मम कृते, सर्वे यतः स्वकीयाः।

६

येऽद्य गर्हिते कर्मणि लीनाः प्राप्नुवन्ति धिक्कारम्
तेऽपि भवितुमर्हन्त्येकस्मिन् दिने समादरणीयाः।

७

सर्वसमर्थः सृष्टिनियन्ता, तस्मिन् मम विश्वासः
यत्कृपया त्वरितं जायन्ते घृणिता अपि रमणीयाः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नौकाः

डा० प्रकाश पाण्डे
डी०लिट्०
'अहल्या'
दत्तमन्दिरस्य पश्चात्
सोमलवाडा वर्धारोड
नागपुरम्

सरस्वत्याः नौकाः इमाः
युगयात्रायै प्रयाताः
पत्राणि शुभ्रपोतवसनानाम्
महाशून्ये प्रफुल्लिताः
कुरुते हर्ष-बीजोद्वपनम्
मन्दः सुसौरभसमीरणः
रक्ततेजसैव न्युप्तम् नीलविहायोमन्दिरम्
रत्नाकरे दोलायते
हीरक-मौक्तिकानां जलम्
गायति सुवत्सलं सागरतीरम्
आशीर्वचांसि गीतानां किल
चतुराशानां देवताः
स्थिता देहली-उपरि
करे घनानां स्थाली-ग्रामः
तस्मिन्दीपशिखार्तिक्यम्
एवंविधे समुत्सवे
द्वारमपारस्योदि्भन्नम्
त्रयाणां समयानां स्वैरः
मत्त-नृत्यग्रामः पुरः
नौकाः प्रयान्त्यः प्रयान्त्यः
दूरं सागरतीरनगरात्
जीवादपि सुविश्लिष्टम्
जातमपरं जीवितम्
हीनं मलिनं नश्वरम्
विश्वं तीरे निर्गलति
दिव्य-प्रतिभा-दीपशिखा
युग-युगेषु ज्वलति......
(कुसुमाग्रजः)

डा० प्रकाश पाण्डेमहाभागोऽर्वाचीनसंस्कृतस्य वरिष्ठो रचनाकारोऽति। अस्य नवनूतनविषयानवलम्ब्य अनेका रचनाः सम्पादकेन लभ्यन्ते। सर्वासामुपयोगस्तु कर्तुं न शक्यते किन्तु यथावकाशमस्य रचनानां प्रकाशनमत्र पत्रे सादरं क्रियते। अस्य **'विग्नदेईमन्'** – इतिशीर्षकं काव्यसङ्कलनं कानिचिद्वर्षाणि पूर्वं प्रकाशितं जातम्। अयं रचनाकारश्चिन्तकः समीक्षकश्चास्ति। अयं कदाचिच्छन्दोबद्धां गीतिं रचयति कदाचिच्च मुक्तच्छन्दोरचनां करोति। मुक्तवृत्तरचनास्वस्य विशेषा रुचिः। 'कुसुमाग्रज' इत्यस्य लेखनीनाम। पाठकाः पाण्डेमहाभागस्य कर्तृत्वविषये अधिकतरं ज्ञातुमस्योपरिलिखिते संकेते पत्रव्यवहारं कर्तुमर्हन्ति।

– सम्पादकः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दशमविश्वसंस्कृतसम्मेलनावसरे संस्कृतकविसम्मेलनम्

बंगलोरनगरे रवीन्द्रनाथ टैगोर (आर० टी०) नगरस्थे तरळबाळुकेन्द्र–प्रेक्षागारे ७.१.१९९७ तारिकायां रात्रौ ६:०० वादनतः ११:४० वादनपर्यन्तं संस्कृतकविसम्मेलनमायोज्यत यस्याध्यक्ष्यमाचार्यश्रीनिवासरथमहाभागेन कृतम्। सञ्चालनं डा० भास्कराचार्यत्रिपाठिना एतत्पंक्तिलेखकेन (रमाकान्तशुक्लेन) च कृतम्।

कविसम्मेलनस्य प्रारम्भो रमाकान्तशुक्लस्य 'वाणी वयं वन्दामहे' इत्यनया गीत्याभवत्। दशमविश्वसंस्कृतसम्मेलनस्य आयोजनसमितेः मानार्हाध्यक्षेण डा० शिवमूर्तिमहास्वामिना पद्यमय्यः शुभाशिषः प्रदत्ताः किञ्च स्वगुरूणां शान्तदेशिकमहास्वामिनां पद्यानि श्रावितानि। अन्ताराष्ट्रिय संस्कृताध्ययन–समवायस्याध्यक्षेण डा० रामकरणशर्मणा सद्यः प्रकाशितात् 'सर्वमङ्गला' नाम्नः काव्यसङ्ग्रहात् 'निरुत्तरशतकम्' अंशतः पठितम्। बंगलूरवास्तव्येन डा० आर० गणेशेन हास्यकविता चित्रकाव्यं च प्रस्तुते। डा० दीक्षितपुष्पया (बिलासपुरतः) 'कथं वर्ते', डा० भास्कराचार्यत्रिपाठिना (भोपालतः) 'खगकलरव इह रतिमुपजनयति' इति सर्वलघुवर्णोपेतं काव्यम्, डा० कमलेशदत्तत्रिपाठिना (वाराणसीतः) 'कालिदासः' 'सुतनुके' इतिरचनाद्वयं, डा० जनार्दनप्रसादपाण्डेयमणिना 'कामयेऽहम्', डा० जयश्रीचट्टोपाध्यायया (कलिकातातः) 'जननी', डा० श्रीमत्या के० एस० मीनाम्बया (केरलतः) 'अभिमुखं गलितमिदं कुसुमम्', डा० प्रभाकरनारायणकवठेकरेण (इन्दौरतः) 'विमानबाला' डा० दीपकघोषेण (कलिकातातः) 'आनन्दधारा' – अनुवादकाव्यम् डा० बी० वेंकटकृष्णेन (बेंगलूरतः) 'विश्वसुन्दरीस्पर्धाः' 'दन्त्याक्षरैः कुरुसभायां द्रौपद्या वर्णनं' 'लोचनैर्वञ्चितोऽसी'ति समस्यापूर्तिश्च, डा० हरिदत्तशर्मणा (इलाहाबादतः) 'न जाने', डा० कमलेशझामहाशयेन (दरभंगातः) 'तत्त्वमेव शिवतत्त्वमीदृशम्', डा० श्रीमत्या एस० आर० लीलया (बेंगलूरतः) 'वसन्तबाला', प्रो० शान्तिनाथघोषेण (कलिकातातः) 'महेशस्तुतिः' 'हिंसाग्रस्तपृथिव्या दशा' च, डा० कौशलेन्द्रपाण्डेयेन

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(वाराणसीतः) 'घोटालासूक्तम्', डा० हरेकृष्णमेहेरेण (कलाहाण्डी–उत्कलतः) 'नूतनवर्षम्', डा० सुधीकान्तभारद्वाजेन (रोहतकतः) 'दशमं विश्वसंस्कृतसम्मेलनम्', डा० जगदीशप्रसादमिश्रेण (रीवातः) 'शरद्वर्णनम्', डा० रामाशीषपाण्डेयेन (राँचीतः) 'धिक् तान् धिक् तान्', श्रीनिलिम्पत्रिपाठिना (भोपालतः) 'जीवनसङ्ग्रामे', श्रीलालाशंकरेण (दिल्लीतः) 'वादे वादे जायते विवादः', डा० अयनभट्टाचार्येण (कलिकातातः) 'बेंगालुरे सुन्दरे', डा० शिवसागरत्रिपाठिना (जयपुरतः) 'भज नेतारम्', डा० पूर्णचन्द्रशास्त्रिणा (बरगड़तः) 'अतिवृष्टिवर्णनम्', रमाकान्त शुक्लेन (दिल्लीतः) च 'उत्तरमङ्गलम्' इत्येता रचनाः पठिताः। डा० निरञ्जनदाशस्य (कमगाँ–उत्कलतः), पं० ओगेटिपरीक्षितशर्मणः, प्रो० रामचन्द्र ए० शाण्डिल्यस्य (उल्हासनगरतः) प्रा० हरिश्चन्द्ररेणापुरकरस्य (गुलबर्गातः) रचनाः पठितत्वेन स्वीकृता अभूवन्। अध्यक्षेणाचार्यश्रीनिवासरथेन 'विजनं भवतु भवतु वा नगर' मित्यादिगीतं गीतम्। *(रमाकान्त शुक्लः)*

दशमविश्वसंस्कृतसम्मेलनावसरे व्यवस्था

दशमविश्वसंस्कृतसम्मेलनवसरे मधुरतिक्तानुभूतयः प्रतिनिधीनामासन्। तरळबाळुकेन्द्रे अनेके स्वयंसेवकाः प्रतिनिधीनां सहायतामाचरन्तो दृष्टा अभूवन्; तेषां व्यवहारेण ते अत्यन्तं सन्तुष्टा अदृश्यन्त। संयोजकैः कृतेऽपि प्रयत्ने केचन प्रतिनिधयः समयेन परिचयपत्रम्, उद्घाटन सत्रनिमन्त्रणपत्रं च नापुः। अनेके सदस्याः वितरणसामग्रीं, पुटकं, शोधपत्रसारसङ्ग्रहं, राष्ट्रियसंस्कृतसंस्थानप्रकाशितग्रन्थत्रयञ्च लब्धुं न शेकुः। केचन जलाभावेन भोजनाभावेन यानाभावेन च पीडिता आसन्। स्थानीयपत्रैरेतस्मिन् विषये बहु प्रकाशितम्। बहुजनसम्मर्दे एतादृश्योऽव्यवस्थाः प्रायो दृश्यन्त एव। क्षमाशीलाः सज्जना इमाः सद्य एव विस्मरन्ति –

कल्पनातीतदुःखानां वा सौख्यानां वापि पराः काष्ठाः ।
समभावतया सोढुं शक्ता समबुद्धिर्भारतजनताहम् ।।

एकं पत्रमस्मत्सकाशे आगतम्। विवक्षितं ह्यनुक्तमनुतापं जनयतीति कृत्वा यथावत् तत्प्रकाश्यते। आशासे पत्रलेखिकाया मन्युरपि शान्तिमेष्यति, आयत्यां च संयोजकाः अधिकतरं सावधाना भविष्यन्ति। (र.का.शु.)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दशमविश्वसंस्कृतसम्मेलनसम्पूर्तौ

सुरेन्द्रभवनोपमे तरलवालुकेन्द्राजिरे-
नवद्यसुरभारती-दशम-विश्वसम्मेलनम् ।
नियोज्य शिवमूर्तिना सुकृतिना महास्वामिना
सनातनपरम्परानुतगवैदुषी सत्कृता ॥
बुधैरिह समागतैर्विविधशास्त्रपारङ्गतै-
र्विविच्य बहुशोन्वहं बुधसभासु चर्चारतैः ।
अनायि दिनसप्तकं क्षणमिवान्यचिन्तां विना-
धुना स्वगृहवर्त्म तैः पुनरनिच्छया सेव्यते ॥
समृद्धिरिह वर्धतां तरलवालुकेन्द्रे सदा
तनोतु भुवनेखिले स शिवमूर्तिकीर्तिं शिवः ।
प्रसारयतु संस्कृतं जगति विश्वसम्मेलनं
समर्थितमनोरथाः शिवदृशा कृतार्था वयम् ॥

—आचार्यश्रीनिवासरथः

८.१.१९९७

१८ कालिदासमार्गः, उज्जैन–456010

जार्जकार्डोनाः

Gurukul Kangri Vishwavidyalaya HARIDWAR

अजस्रं पाणिनेः शास्त्रेऽवगाहैः पूतया वाचा
मनांस्यस्माकमत्यर्थं सिनीते जार्जकार्डोनाः ॥
अहो तेजो यदीयं सौरतेजो भर्त्सयत्येतत्
स्वतेजोभिर्नभोमध्यं स्तृणीते जार्जकार्डोनाः ॥
मतिः सन्दिह्यते शास्त्रे रतानां यत्र विभ्रान्ता
स ग्रन्थग्रन्थिकाठिन्यं लुनीते जार्जकार्डोनाः ॥
विवक्षूणां विवादं सस्मितं पश्यन् सभामध्यम्
कियत् कस्यास्ति गाम्भीर्यं मिमीते जार्जकार्डोनाः ॥
यदीया कीर्तिरूर्ध्वादूर्ध्वमुद्गच्छत्यविश्रान्ता
स कीर्त्या शास्त्रधौरेयान् धुनीते जार्जकार्डोनाः ॥
दिविष्ठैः सस्पृहं या काम्यते कृच्छ्रं तपस्तप्तुम्
तपस्वी तां तपोभूमिं पुनीते जार्जकार्डोनाः ॥

७.१.१९९७

डा० दीक्षितपुष्पा तेलीपारा, बिलासपुर (म०प्र०)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लब्धं भवतीनां पत्रम्

रायपुर १०.१.९७

श्री आदरणीय सर,

सादर प्रणाम, आज १५.१०.९७ का अर्वाचीनसंस्कृतम् का अंक प्राप्त हुआ। सम्मेलन मे मैं आपसे कुछ कहना चाहती थी परंतु वह अवसर उचित नहीं था इसलिए नहीं कह सकी। इस सम्मेलन में रायपुर से मैं, डा० मनीषा पाठक, श्री कान्हे एवं तोयनिधि वैष्णव हम सब थे। हमें यहां की अव्यवस्था से अत्यंत कष्ट हो रहा था। अतः इच्छा न होते हुए भी हमें वहां से निकलना पडा। वस्तुतः वहां विद्वानों का समागम निश्चित ही बौद्धिक दृष्ट्या उत्तम था किन्तु तरळवाळु के आयोजक एवं जिस **Sport Authority of India** में हमें ठहराया गया उनके मालिक इनमे कोई संबंध न होने के कारण आर्थिक दृष्टि से हमे बहुत भारी पडा। अत्यंत दूर होने के कारण इच्छानुसार विश्रांति हेतु नहीं आ सकते थे। इसी तरह की अनंत शिकायतें हैं जिन्हें आलोचना के तहत सूत्र रूप में (अर्वाचीनसंस्कृतम्) संकेत करें तो बड़ी कृपा होगी। लिटरेचर के साथ फाइल नहीं दी गई। समाप्त हो गई कहा गया समय तक रजिस्ट्रेशन किया गया। एक बहन को रात बारह बजे महिलाछात्रावास के पास तालाबंद ऐसे भवन के पास छोड़ दिया गया वह बेचारी किसी मुस्लिम चौकीदार परिवार के आश्रय में गई। तीन विकल्प छह तारीख के पर्यटन में पूछे गए जिसमें हम तथा और भी कई (जिन्होने बंगलोर देखा) उन्हें भूखा प्यासा केवल रोड घुमाकर छोड़ दिया तथा अन्य मैसूर आदि वालोंको निशुल्क भोजनादि सुविधाएं अर्थात् भेद–भावनीति। इससे भी असंतोष व्याप्त है। सारांश आर्थिक दृष्टि से काफी शोषण किया गया। सिक्यूरिटी गार्ड न होने से एक बहन की पर्स भरी हुई खो गई। किसी का वीसा खो गया। अब तो संकल्प ले लिया जाए कि आगामी किसी सम्मेलन में न जाएं। जिनका शोध लेख स्वीकृत नहीं हुआ वे भी क्लासिकल सेक्शन में दुराग्रह कर पढ़ने का प्रयास कर सफल हो गए। इस दिशा में योग्य मार्गदर्शन करने की कृपा करें। कम से कम प्रसारण विभाग दैनिक अखिल भारतीय स्तर के समाचार पत्रों में इसे देना आवश्यक है। इस बात को समझ सकते हैं कि भीड़ नियंत्रण से बाहर थी, परंतु उनकी ओर से स्वयंसेवकों की व्यवस्था कर इसपर नियंत्रण रखा जा सकता था। आप अन्यथा न लें। क्षमा चाहती हूँ। आपने विष्णुसहस्रनाम के संबंध में याद दिलाने को कहा था, अतः विषयांतर भी अधिक विस्तृत हो गया।

डा० कुमुद कान्हे

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(१) दुर्गनगरस्थे शासकीयविज्ञानमहाविद्यालये १८.१०.१९९६ ई० तारिकायां 'सुसंस्कृतम्–९६' – इतीदं सारस्वतमनुष्ठानं समायोज्यत। मुख्यातिथिना दुर्गजिलाधिकारिणा श्रीमता सेवाराममहोदयेन संस्कृतस्य प्रचार–प्रसारार्थं जनानां प्रयासा आहूताः। सुख्यातेन हिन्दी – छत्तीसगढी – कथाकारेण श्रीपरदेशीरामवर्मणा भारतीयसाहित्यस्यावगाहनार्थं संस्कृतस्यानिवार्या भूमिका समुपश्लोकिता। कार्यक्रमस्य संयोजनं संस्कृतविभागाध्यक्षेण डा० महेशचन्द्रशर्मणा कृतम् आध्यक्ष्यं च महाविद्यालयप्राचार्येण श्री जे० पी० शर्मणा निर्व्यूढम्। बी० ए० प्रथम – द्वितीय – तृतीयवर्षेषु सर्वोच्चाङ्कानां लब्धारः कु० हर्षलता – कु० मथुरा – श्री मनोजकुमारठाकुराः 'सुसंस्कृतम्–९६' इति सम्मानपदेनालङ्कृता अभूवन्।

(२) दिल्लीदूरदर्शनेन राष्ट्रीयचैनले 'ध्वन्यालोक आडियो विजुअल प्रा० लि०' – इत्यनया संस्थया अभिनवशुक्लस्य निर्देष्टृत्वे निर्मितयोः 'संस्कृतकविवाणी' – प्रथमद्वितीयभागयोः २०.२१.११.१९९६ तारिकयोः ११:३० वादनकाले प्रसारणं कृतम्। प्रथमे भागे आचार्यश्रीनिवासरथस्य **'उज्जयिनी जयते'** इत्यस्याः कवितायाश्चित्राङ्कनं द्वितीये च भागे, दिल्ली–संस्कृत–अकादम्या १७.१.९६ तारिकायामायोजितस्य अ०भा० संस्कृतकविसम्मेलनस्यांशाः सम्पादिता अभूवन्। 'ध्वन्यालोक' – संस्थया उभावपि कार्यक्रमौ दूरदर्शनाय निःशुल्कं प्रसारणार्थं प्रदत्तौ।

२४.११.९६ तारिकायाम् आकाशवाण्या दिल्लीकेन्द्रात् साहित्यिक्यां 'संस्कृतसाहित्ये श्रुतिपरम्परा' इति विषयमवलम्ब्य परिचर्चा प्रसारिताभूत् यत्र डा० रमाकान्त शुक्ल – डा० रवीन्द्रनागराभ्यां सहभागित्वं निर्व्यूढम्। कार्यक्रमस्य निष्पादनं श्रीमता कमलदत्तेन कृतम्।

(३) डा० केशवचन्द्रदाशमहाभागाय 'ईशा'काव्यरचनार्थं १९९६–९७ वर्षीयः 'साहित्य – अकादमी–पुरस्कारो' दास्यते।

(४) 'दिल्ली संस्कृत अकादमी' २७.२.९७ – १.३.९७ तारिकासु 'विश्वयुवक केन्द्र, सरकुलर रोड, चाणक्यपुरी, नयी दिल्ली–११० ०२१' इत्यत्र त्रिदिवसीयम् अ० भा० संस्कृतसम्मेलनमायोजयति।

(५) नवदिल्ल्यां १२.११.९६ तः – २.१२.९६ यावत् श्रीलालबहादुर शास्त्री

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri
राष्ट्रियसंस्कृतविद्यापीठेन पुरश्चर्याकार्यक्रमः समायोजितः। १४.११.६६ तारिकायां डा० रमेशचन्द्रचतुर्वेदस्याध्यक्ष्ये डा० रमाकान्तशुक्लेन अर्वाचीनसंस्कृतसाहित्यं किञ्च डा० शुक्लस्याध्यक्ष्ये पं० देवीदत्त शर्मचतुर्वेदमहाभागेन गीतामवलम्ब्याभिभाषितम्।

(६) मध्यप्रदेशसंस्कृताकादम्या इन्दौरनगरे १५–१६.११.१९९९ तारिकयोः पुरस्कारवितरणम् अनेकान्त–संगोष्ठी चायोजिते यत्र पञ्चविंशतिप्रायाणि शोधपत्राण्यपठ्यन्त।

(७) उज्जयिन्याम् २१.११.६६ तः २७.११.६६ यावत् कालिदाससमारोहः सम्मानितोऽभूत्। २२.११.६६ तारिकायां कालिदास–अकादम्या 'कविभारती' समायोजिता यत्र भारतीयभाषासु कविताः प्रस्तुता अभूवन्। २५.११.६६ तारिकायां 'संस्कृत–कविसमवायः' समायोज्यत यस्याध्यक्ष्यं डा० जगन्नाथ पाठकेन सञ्चालकत्वं च डा० भास्कराचार्यत्रिपाठिना निर्व्यूढम्। कवीनां पञ्चविंशत्या स्वरचनाः प्रस्तुताः। २६.११.६६ तारिकायां 'तदेव गगनं सैव धरा' कार्यक्रमः समायोज्यत यत्र आचार्यश्रीनिवासरथस्य गीतीनां गानं पण्डितओमप्रकाशशर्मणा तत्सहयोगिभिश्च कृतम्।

(८) दिल्ल्यां हिन्दी–भवनेन ७.११.६६ तारिकायां 'आलोकपर्व' समायोजितं यत्र हिन्दी–संस्कृत–पंजाबी–उर्दू–सिन्धी–कविभिः स्वरचनाः प्रस्तुताः। संस्कृतस्य प्रातिनिध्यं रमाकान्तशुक्लेन 'भारतजनताहम्' इति रचनया कृतम्। सयोजनं डा० बालस्वरूपराही अकरोत्।

(६) दिल्याः हिन्दी – अकादम्या २७.११.६६ तारिकायां त्रिवेणी–सभागारे 'भारतीयभाषाकविसम्मेलन'मायोजितं यस्योद्घाटनं दिल्ली–मुख्यमन्त्रिणा श्रीसाहबसिंहवर्मणा, आध्यक्ष्यं डा० वेदप्रतापवैदिकेन सञ्चालनञ्च डा० सोमप्रकाशसुधेशेन कृतम्। संस्कृतस्य रचना 'वन्द्यतां कापि सा शासनासन्दिका' रमाकान्तशुक्लेन श्राविता।

(१०) रीवास्थ–अवधेशप्रतापसिंहविश्वविद्यालयेन २८–३० तारिकासु 'संस्कृत–संगोष्ठी' आयोजिता यत्र विंशतिप्राया विद्वांसः पत्राणि पपठुः। विश्वविद्यालये संस्कृतविभागस्य स्थापनार्थमपि प्रस्तावः स्वीकृतोऽभूत्।

(११) २३.८.१९९९ तारिकायां नवदिल्ल्यां पटियालाहाउससभागारे दिल्ली विश्वविद्यालयस्य कुलपतिना प्रो० व्रजेन्द्रराजमेहता–महाभागेन

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मैत्रेयीमहाविद्यालयस्य आचार्याया विश्रुतविदुष्या डा० शशितिवारी महोदयायाः नवीनतमो ग्रन्थः 'संस्कृतलोकोक्तिकोशः' लोकायार्पितः। अवसरेऽस्मिन् साहित्य–जगतोऽनेके लब्धप्रतिष्ठा विद्वांस उपातिष्ठन्।

(१२) मैत्रेयीमहाविद्यालयस्य संस्कृतविभागे रीडरपदं भूषयित्वा डा० शशिप्रभाकुमारमहाभागा नवम्बरतो दिल्लीविश्वविद्यालयस्य दक्षिणपरिसरे दर्शनविभागस्याचार्यपदमलंकरोति। (अभिनव शुक्लः)

देववाणी-परिषद्वार्ता

(१) देववाणी–परिषद एकविंशः स्थापनादिवससमारोहः १३.१२.१९९९ ई० तारिकायाम् 'रमालयः, आर ६, वाणी विहारः, नयी दिल्ली – ११० ०५९' इत्यत्र सम्मानितोऽभूत्। डा० रवीन्द्रनागरेण मङ्गलाचरणं कृतम्। अभिनवशुक्लेन अक्षरश्लोकस्य सञ्चालनं कृतम्। परिषदुपाध्यक्षा श्रीमती रमा शुक्ला ग्रन्थप्रदर्शनीमुदघाटयत्। डा० रमाकान्तशुक्लः काव्यपाठं कृतवान्। आनन्दवर्धनो धन्यवादज्ञापनमकरोत्।

(२) १८.१०.९९ तारिकायां ५:१५ वादनकाले देववाणी–परिषदा रमाकान्तशुक्लस्य निर्देशे 'ध्वन्यालोक' संस्थया निर्मापितं –'यत्र नार्यस्तु पूज्यन्ते' इत्येतच्चलच्चित्रं दिल्लीदूरदर्शनेन राष्ट्रियचैनले निशुल्कं प्रसारितम्। (आनन्दवर्धनः)

कीर्तिशेषेभ्यो देववाणी-परिषत्सदस्येभ्यः श्रद्धाञ्जलयः

देववाणी–परिषदो मान्यसदस्यानां, राजस्थानसंस्कृत–परिषदः संस्थापकानां वेदविद्यानिष्णातानां त्रिंशत्यधिकग्रन्थरचयितॄणां डा० सुधीरकुमारगुप्तमहाभागानां निधनं १४.६.१९९५ तारिकायां जयपुरे हृदयगत्यवरोधेन जातम्। १९७९ तमे वर्षे देववाणी–परिषदं द्वितीयाध्यक्षत्वेन सेवमानानां दिल्लीविश्वविद्यालयस्य संस्कृतविभागाचार्याध्यक्षचराणां डा० व्रजमोहनचतुर्वेदमहाभागानां ४.१.१९९७ तारिकायां दिल्ल्यां पक्षाघातपीडया निधनं जातम्। देववाणी–परिषद आजीवनसदस्यानां स्वर्गीयपण्डितपरमानन्दशास्त्रिविद्यावाचस्पतेः पौत्राणां चिकित्साविदां डा० सुरेन्द्रप्रभातकुमारशर्मणां २५.१२.१९९९ तारिकायां बुलन्दशहरे निधनं जातम्। एभिस्सर्वैरपि महाशयैराजीवनं ज्ञानस्यार्जनं वितरणञ्च कृत्वा स्वधर्मे निधनमवाप्तम्। एतेषां तिरोधानेन देवाणी–परिषद् रिक्ततामनुभवति। परमेश्वरं प्रार्थयामः – एतेषामात्मा शान्तिमवाप्नोतु। देववाणी–परिषत्पक्षत एतेभ्यः श्रद्धाञ्जलयः समर्प्यन्ते।

रमाकान्त शुक्लः,
महासचिवः, देववाणी–परिषद्, दिल्ली,
आर ६, वाणी विहारः, नयी दिल्ली–११० ०५९

१५.१.१९९७

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शुद्धिपत्रम्

पृष्ठे	पंक्तौ	अशुद्धम्	शुद्धम्
२	२७	सर्पया	सपर्यां
३	१	यानिं	यानि
३	६	समुदैति	समुदेति
३	२०	विरुपी	विरूपी
३	२१	–दिण्ड	दण्ड
३	२३	याथार्थ	यथार्थ
६	२५	हम्:	हम्
१०	२	शाखाः	शाखा
१२	५	कस्तु	कतस्तु
१२	७	आशका	आशङ्काका
१३	३	रिदार्न	रिदानीं
१३	१३	वृतानर	वृतार
१४	१३	कूजक	कूजन
१६	७	सड्ग्रहौ	सङ्ग्रहौ
१८	२३	रन्वेषम्	रन्वेषणम्
२२	६	ऊहो	ऊहा
२२	१०	परिस्पदं	परिस्पन्दं
२२	१३	नीजा	नीला
२२	१६	भविष्यते	भविष्ये
२२	१६	(पृ०२१)	(मधुयानम्, पृ०२१)
२२	२७	(पृ०४६)	(अञ्जलिः,पृ०४६)
२४	२२	निस्मीमं	निस्सीम
२५	४	धुवर	थुवर
२५	१६	भूगोलिकं	भौगोलिकं
२५	१७	याय	र्याय
२५	१८	तत्रं	तन्त्रं
२६	१२	१६६	१६६६

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

दिल्ली संस्कृत अकादमी की वर्ष १६६५-६६ की उपलब्धियां

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रतियोगिताएं :-

(१) संस्कृत श्लोक संगीत प्रतियोगिता :-

(क) संस्कृत श्लोकोच्चारण प्रतियोगिता, (ख) संस्कृत भाषण प्रतियोगिता (घ) संस्कृत काव्यालि, (ङ) एकल श्लोक संगीत प्रतियोगिता

(२) संस्कृत की विविध प्रतियोगिता :-

(क) अक्षरश्लोक प्रतियोगिता, (ख) व्याकरण सूत्रान्त्याक्षरी प्रतियोगिता (ग) संस्कृत शिक्षक शोध निबन्ध प्रतियोगिता, (घ) महाविद्यालयीय श्लोक संगीत प्रतियोगिता, (ङ) वेदमन्त्रान्त्याक्षरी प्रतियोगिता, (च) महाविद्यालयीय तथा मध्यमा स्तरीय एकल श्लोक संगीत प्रतियोगिता, (छ) महाविद्यालयीय/मध्यमा स्तरीय संस्कृत भाषण प्रतियोगिता, (ज) संस्कृत प्रश्नमंच प्रतियोगिता, (झ) अखिल भारतीय नवोदित संस्कृत कवि प्रतियोगिता, (ञ) संस्कृत श्लोकान्त्याक्षरी प्रतियोगिता स्नातक/स्नातकोत्तर एवं मध्यमा स्तरीय।

जयन्तियां एवं संगोष्ठियां :-

(क) वेदव्यास जयन्ती के उपलक्ष्य में "गीता में कर्मयोग" विषय पर संगोष्ठी

(ख) महर्षि वाल्मीकि जयन्ती के उपलक्ष्य में "वाल्मीकि रामायण में मानवीय चेतना" विषय पर संगोष्ठी, (ग) पण्डितराज जगन्नाथ जयन्ती के उपलक्ष्य में "संस्कृत साहित्य में अन्योक्तियां" विषय पर संगोष्ठी (घ) विज्ञान संगोष्ठी, (ङ) 'संस्कृत साहित्य में भूगर्भ विज्ञान' विषय पर संगोष्ठी, (च) प्रचीन भारतीय गुप्तचर व्यवस्था विषय पर संगोष्ठी।

परिचर्चाएं :-

(क) 'भारतीय दर्शन शास्त्र के आधार पर जीवन पद्धति' विषय पर परिचर्चा

(ख) 'राष्ट्रिय एकता के लिए गुरु गोविन्द सिंह का योगदान' विषय पर परिचर्चा

सम्मान :-

(क) महाविद्यालय/विद्यालय संस्कृत सेवा सम्मान, (ख) संस्कृत साहित्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

सेवा सम्मान १९९५–९६, (ग) संस्कृत समाराधक सम्मान १९९५–९६
Digitized by Arya Samaj Foundation Chennai and eGangotri
(घ) विद्यालय/महाविद्यालय संस्कृत नाट्य समाराधक सम्मान, (ङ) संस्कृत सेवा सम्मान १९९५–९६, (च) संस्कृत व संगीत शिक्षकों का सम्मान

समारोह :-

(क) अकादमी वार्षिकी १९९४–९५ का लोकार्पण समारोह, (ख) संस्कृत नाट्य समारोह (विद्यालय एवं महाविद्यालय), (ग) अकादमी द्वारा प्रकाशित महाबुद्धवत्थु के षष्ठ भाग का लोकार्पण समारोह, (घ) संस्कृत प्रतियोगिता पुरस्कार समारोह १९९४–९५ एवं १९९५–९६, (ङ) संस्कृत दिवस समारोह

(च) संस्कृत छात्रवृत्ति वितरण समारोह

सम्मेलन :-

(क) स्वतन्त्रता दिवस के उपलक्ष्य में राष्ट्रिय संस्कृत कवि सम्मेलन (ख) गोस्वामी गिरधारी लाल जयन्ती के उपलक्ष्य में अखिल भारतीय ज्योतिष सम्मेलन, (ग) अखिल भारतीय आयुर्वेद सम्मेलन, (घ) अखिल भारतीय संस्कृत पत्रकारिता सम्मेलन, (ङ) अखिल भारतीय द्वि दिवसीय वैदिक सम्मेलन, (च) गणतन्त्र दिवस के उपलक्ष्य में अखिल भारतीय संस्कृत कवि सम्मेलन

पुरस्कार :-

(क) संस्कृत प्रतिभा पुरस्कार १९९५, (ख) संस्कृत शिक्षक पुरस्कार (१९९४), (ग) अखिल भारतीय मौलिक संस्कृत साहित्य रचना पुरस्कार १९९५–९६, (घ) विशेष संस्कृत पुरस्कार

शिविर :- (क) दस दिवसीय संस्कृत व्यवहार शिविर, (ख) संस्कृत भारती के तत्त्वावधान में संस्कृत प्रशिक्षणार्थी शिविर

प्रकाशन :-

(क) महाबुद्धवत्थु के षष्ठ भाग का प्रकाशन, (ख) वार्षिकी १९९४–९५ (ग) संस्कृत मंजरी पत्रिका, (घ) व्यावहारिक संस्कृतम् कैसेट

प्रकाशन सहयोग :- (१) पाण्डुलिपि प्रकाशन सहयोग १९९५–९६

अध्ययन केन्द्र :- (१) चार संस्कृत अध्ययन केन्द्रों का सफल संचालन।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अर्वाचीनसंस्कृतम्

(अर्वाचीनसंस्कृतपरकं त्रैमासिकं पत्रम्)

एकोनविंशे वर्षे द्वितीयस्तृतीयश्चतुर्थश्च

संयुक्तोऽङ्कः

प्रधानसम्पादकः

डॉ० रमाकान्त शुक्लः

एम० ए०, पीएच० डी०, साहित्याचार्यः

सांख्ययोगाचार्यः

LIBRARY

Gurukul Kangri Vishwavidyalaya

HARDWAR

देववाणी-परिषद्, दिल्ली

६, वाणी—विहारः, नयी दिल्ली—११००५९

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

परामर्शदातृ–मण्डलम्

१. आचार्य श्रीनिवास रथः
४. डा० विष्णुकान्त शुक्लः
२. "अभिराज" डा० राजेन्द्र मिश्रः
५. डा० भास्कराचार्य त्रिपाठी
३. डा० उमाकान्त शुक्लः
६. डा० इच्छाराम द्विवेदी "प्रणवः"

Digitized by Arya Samaj Foundation Chennai and eGangotri

अर्वाचीनसंस्कृतम् (१९/२-४)

१५ अप्रैल, १५ जुलाई, १५ अक्टूबर १९९७ ई०

प्रकाशनतिथि : १५.१०.१९९७

विषयसूची

१. सम्पादकीयम्		१–४
२. माता शिशुश्च–	श्री श्रीसुन्दरराजः	५–६
३. आशीर्वचनम्–	'अभिराज'राजेन्द्रमिश्रः	७–८
३. अर्वाचीनकविमाला–	डा० सम्पूरु रङ्गनाथः	९–७२

अर्वाचीनसंस्कृतम् (पंजी. सं. ३४५५४/७९)

१. प्रकाशनस्थानम्–नयी दिल्ली ।

२. प्रकाशनकालावधिः–त्रैमासिकम् ।

३. सङ्केतेन सह मुद्रकस्य, प्रकाशकस्य सम्पादकस्य च नाम नागरिकता च–डॉ० रमाकान्तशुक्लः, भारतीयः, देववाणी–परिषद्, दिल्ली, ६, वाणी विहार नयी दिल्ली–११००५९

४. पत्राधिकारिणां नाम्ना सह सङ्केतः–देववाणी–परिषद्, दिल्ली, ६, वाणी विहार नयी दिल्ली–११००५९

डा० रमाकान्तशुक्ल इति नामाहं समुद्घोषयामि यदुपरिलिखितं सकलमपि विवरणं मम मतौ सत्यमस्ति ।

रमाकान्तशुक्लः

१५.१०.१९९७ ई.

प्रकाशकः, सम्पादकः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकीयम्

डा० कृष्णकान्तशुक्ल:
(१५.१.१९३६ – २१.५.१९९७)

अर्वाचीनसंस्कृतस्यायमङ्कोऽस्य पत्रस्य परामर्शदातृ मण्डलस्यैकोनविंशतिवर्षाणि यावत्सदस्यभूतस्य विद्वद्वरस्य डा० कृष्णकान्तशुक्लस्य स्मृत्यै समर्प्यते।

डा० शुक्ल: १५.१.१९३६ तारिकायाम् उत्तरप्रदेशस्य बुलन्दशहरजन– पदान्तर्गत–खुर्जानगरे पितुराचार्य श्रीब्रह्मानन्दशुक्लाज्जनन्यां श्रीमत्यां प्रियम्वदाशुक्लायां जनिं लेभे। खुर्जास्थे श्रीराधाकृष्णसंस्कृतमहाविद्यालये विद्यावाचस्पतिपण्डितपरमानन्द– शास्त्रि–पं० कुबेरदत्तशास्त्रि–साहित्याचार्य श्रीब्रह्मानन्दशुक्लेभ्य: स: संस्कृतमधीतवान् । स्वपितुर्गुरोश्च आचार्यश्रीब्रह्मानन्दशुक्लस्य मुखात्तेन साहित्य–मधीतं किञ्च वाराणसेय–राजकीयसंस्कृतकालेजस्य "साहित्याचार्य"–परीक्षोत्तीर्णा। तेन खुर्जास्थ– एन०आर०ई०सी० कालेजत: आगराविश्वविद्यालयस्य हिन्दी–एम० ए०–परीक्षोत्तीर्णा। तेन व्यक्तिगतच्छात्ररूपेण आगरा विश्वविद्यालयत: संस्कृत विषये "एम० ए०" परीक्षा प्रथमश्रेण्यामुत्तीर्णा । प्रयागत: 'साहित्यरत्न' परीक्षापि तेनोत्तीर्णा । १९६१ त: १९९६ तमं वर्ष यावत्तेन बरेलीकालेजस्य लखनऊविश्वविद्यालयस्य अलीगढ़मुस्लिमविश्वविद्यालयस्य च संस्कृतविभागेऽ-ध्यापनं कृतम् । बरेलीकालेजात् २.६.१९९६ ई० तारिकायां सेवानिवृतौ स बरेलीस्थे टीबरीनाथसंस्कृतमहाविद्यालये प्रचार्य: किञ्च शास्त्रचूडामणिपण्डित:: सन् संस्कृतं सेवमान आसीत् । तेन "महाकवी रत्नाकरस्तदीयं हरविजयञ्चे" ति विषयमवलम्ब्य बरेली कालेज–संस्कृविभागाध्यक्षस्य आचार्यश्रीलक्ष्मीचन्द्रकौशिकस्य निर्देशे शोधं कृत्वा आगराविश्वविद्यालयत: संस्कृत–विषये "पीएच०डी०" शोधोपाधिर्लब्ध: ।

"संस्कृत–गद्यमञ्जूषा" "हरविजयस्य साहित्यिकमध्ययनम्" ''महाकवी रत्नाकरस्तदीयं हरविजयञ्चे'' त्यादयो डा० शुक्लस्य प्रसिद्धा ग्रन्था: । विविधपत्रपत्रिकासु तस्य लेखा: कविताश्च प्रकाशिता: । स "उत्तर प्रदेश संस्कृत अकादेमी" ति संस्थात: पुरस्कारमपि प्राप्तवान् । सोऽखिलभारतीयप्राच्यविद्यासम्मेलनस्याजीवनसदस्य आसीत्। तेन तस्य विविधेष्वधिवेशनेषु स्वशोधपत्राणि प्रस्तुतानि । तस्य निर्देष्टृत्वे पञ्चविंशतिप्रायै: शोधच्छात्रै: "पीएच० डी०" शोधोपाधिर्लब्ध: । स "देववाणी–परिषद्, दिल्ली" ति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्थाया आजीवनसदस्य: किञ्च पञ्चमोऽध्यक्ष आसीत् । १९८३ तमे खैष्टाब्दे समायोजिते देववाणी–परिषद: षष्ठेऽधिवेशने तेन स्वाध्यक्षीयभाषणे दिल्ल्यां संस्कृताकादम्या: स्थापनार्थमाह्वानं कृतम् । सोऽर्वाचीनसंस्कृतस्य परामर्शदातृमण्डलस्य एकोनविंशति वर्षाणि यावत्सदस्य आसीत् । स उत्तरप्रदेशसंस्कृतसंस्थानस्य डा० सम्पूर्णानन्द–संस्कृतविश्वविद्यालय–विद्वत्परिषदश्च, सदस्य आसीत् । स उदार:, परोपकारी, कष्टसहिष्णुर्विदुषां सम्मानकर्त्ता, गुरुभक्त:, शिष्यवत्सल आतिथेय:, कर्मठ:, सहृदयो मृदुवाक्, सत्यनिष्ठश्च सन्मानव आसीत् । डा० शुक्ल: संस्कृतस्य कविरप्यासीत् । तस्य "ते के न जानीमहे" "जनिं कामयेऽहम्" इत्याद्या रचना अर्वाचीनसंस्कृते प्रकाशिता यत्र तस्य देशभक्ति: प्रकटिता बभूव । तस्याभिलषितं भारतमिदमास्ते–

न याचे पदं नापि वित्तं मनोज्ञं
न वा स्वर्गमेवाश्रये रम्यरम्यम् ।
परं सर्ववन्द्ये सुधासारभूते
पवित्रे स्वदेशे जनिं कामयेऽहम् ।। १ ।।

सतां मानदे, सर्वथोत्कोचशून्ये,
बलात्कारहीने, सुवृत्तप्रधाने ।
निसर्गाजिरे सर्वदा मोदमाने,
ललामे स्वदेशे जनिं कामयेऽहम् ।।२७।।

सदा न्यायरक्षाविधानैकदक्षे
परार्तिप्रणाशाय वै बद्धकक्षे ।
स्ववीर्येण गुप्ते प्रकर्षेण युक्ते,
प्रचण्डे स्वदेशे जनिं कामयेऽहम् ।। २८।।

विकासं निजै: साधनैर्गाहमाने
विशिष्टां स्थितिं विश्वमञ्चे दधाने ।
जगन्मङ्गले चानिशं चेष्टमाने
बलिष्ठे स्वदेशे जनिं कामयेऽहम् ।।२९।।

विवेकप्रियै: साधुवृत्तैरमात्यै–
श्चिरं शासकै: शासितेऽभीष्टवृत्ते ।
वकैर्वञ्चकैश्चाटुकारैर्विमुक्ते
प्रकृष्टे स्वदेशे जनिं कामयेऽहम् ।।३०।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गुणानां गणा यत्र पूजां भजेयु—
र्धनं पक्षपातादयोऽस्तं व्रजेयुः ।
समाना च प्रीतिर्भवेत्तादृशेऽस्मिन्
गुणज्ञे स्वदेशे जनिं कामयेऽहम् ॥३१॥

('जनिं कामयेऽहम्', अर्वाचीनसंस्कृतम् ६/१, पृ० ४५–४८, जनवरी, १९८४ ई०)

नूनमेव डा० शुक्लस्य प्रेरणादायका इमे भावा अद्य विशेषतः प्रासङ्गिकत्वं भजन्ते ।

२१.५.१९९७ तारिकायां डा० सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य दीक्षन्तसमारोहमुपस्थाय यदा रात्रौ वाराणसीतो बरेलीनगरं प्रति रेलयानेन निवर्तमान आसीत्तदा तस्य दुःखदं निधनं जातम्। एतत्पंक्तिलेखकस्य स ज्येष्ठो भ्रातासीत्। अयञ्चाधन्यो जनस्तस्यान्तिमं दर्शनमपि कर्तुं नापारयत् यतो हि तदायं कोङ्कणक्षेत्रे गत आसीत् । अस्मिन्ननुजे तस्य विशिष्टं वात्सल्यमासीत् । वैयक्तिकभावानां प्रकाशनाय नात्रावकाशो न चापि शब्दानां सामर्थ्यम् । परमेश्वरं प्रार्थये यत्स इममाघातं सोढुं तस्य मात्रे, पत्न्यै, सहोदरेभ्यः, सन्तत्यै, छात्रेभ्यः, परिवारजनेभ्य—स्तत्परिचितेभ्यश्च सामर्थ्यं दद्यात् ! अनेकैर्विद्वद्भिः, संस्थाभिः स्निग्धजनैश्च डा० शुक्लस्य निधने शोको व्यक्तः । स्निग्धजनसंविभक्तं दुःखं सह्यवेदनं भवेदेव !

अर्वाचीनसंस्कृतस्यायमङ्को दिवंगताय डा० शुक्लाय श्रद्धाञ्जलिरूपोऽस्ति। अयमङ्क एकोनविंशवर्षस्य द्वितीयस्तृतीयश्चतुर्थश्च संयुक्तोऽङ्कोऽस्ति । अत्र प्रथमं श्रीमतः श्रीसुन्दरराजस्य 'माता शिशुश्चे'ति कारुण्याभिव्यञ्जिका रचना प्रकाश्यते। कश्चिद् बालः मात्रा सार्धं सागरतीरे गच्छति । स तत्र क्रीडामग्नः सन्नम्भोधिलहरीभिराकृष्यते । तं रक्षितुं क्रन्दमाना मातापि गर्जता समुद्रेण कवलीक्रियते। इदमकरुणं समुद्रकृत्यं वीक्ष्य कवेः श्रीसुन्दरराजस्य कारुण्यमेतद्रचनाव्याजेनाविर्भवति—

कारुणाहीनं सुन्दरराजः
करुणं बालेऽप्यस्य जनन्याम् ।
वरुणालयकृतमालोच्यैतत्
करुणं काव्यं कलयाञ्चक्रे ॥१७॥

अतः परं बेंगलूरस्थ एन०के०आर०वी० कालेजे प्राध्यामकपदमलंकुर्वाणस्य वेदविद्यानिष्णातस्य किञ्च अर्वाचीनसंस्कृतसाहित्यसमीक्षकप्रवरस्य डा० सम्पटूरु (एस०) रङ्गनाथस्य **'अर्वाचीनकविमाला'** प्रकाश्यते । १४.९.१९९७ तारिकायां मैनपुरीनगरे तत्रस्थायां माहेश्वरीधर्मशालायामस्याः कृतेः पूर्तिः डा० रङ्गनाथेन तदा कृता यदा स 'आचार्यश्रीलालबिहारीद्विवेदहीरकजयन्त्यां' वेदविषयकं व्याख्यानं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कर्तुं तत्र सुरभारती–सेवासंस्थानेन सादरमाहूत आसीत् । डा० रङ्गनाथस्य वेदपाठमाकर्ण्य अलौकिक एव कश्चिदनुभवः सञ्जायते । विद्याविनयशीलेनानेन युवविदुषा सह मामकीनः परिचयः कानिचिद् वर्षाणि पूर्वं जातः । अनेन मत्सकाशे स्वातन्त्र्योत्तरसंस्कृतसाहित्यमवलम्ब्य स्वरचितं स्वप्रकाशितं च ग्रन्थद्वयं प्रेषितम् यत्रास्य महानुभावस्य व्यापकं गभीरञ्चाध्ययनं स्पष्टं, विलोक्यते । ततः परम् अखिलभारतीयप्राच्यविद्यासम्मेलनस्य रोहतकाधिवेशने, उज्जयिन्यां कालिदाससमारोहे, बेंगलूरे विश्वसंस्कृतसम्मेलने, अन्यत्र चानेन सह वार्तालापसुखमन्वभावि मया । अयं विद्याविनयसम्पन्नस्तपस्वी नूनमेवाभिनन्द्योऽस्मादृशाम् । यदाऽनेनार्वाचीनकवीनवलम्ब्य प्रणीता इयं रचना मह्यं दर्शिता तदैव मयायं महानुभावः 'अर्वाचीनसंस्कृते'ऽस्याः प्रकाशनायानुरुद्धः । अनेन स्वीकृतिर्दत्ता । मया चाक्षरयोजनार्थमियमक्षरयोजकाय प्रदत्ता । अस्याः कृतेरिदं महत्त्वं यदत्र विंशशताब्द्युत्पन्नशताधिकसंस्कृतरचनाकाराणामार्या–श्लोक–शार्दूलविक्रीडितादिवृत्तेषु पद्यबद्धः परिचयो दीयते । एतेन डा० रङ्गनाथस्यार्वाचीनसंस्कृतसाहित्यस्य गम्भीरमध्ययनं संसूच्यते । अनेन संस्कृतकवीनामुपश्लोकेन 'कविसहृदयात्मिका' सरस्वती एव उपश्लोक्यते । वर्धतामस्य तपः, वर्धतामस्य लेखनम् । एवंविधा' प्रयासा अपरेऽप्यपेक्ष्यन्ते ये संस्कृतस्य समृद्धेः सम्यक् सूचकाः स्युः ।

डा० रङ्गनाथमवलम्ब्य शिमलाविश्वविद्यालयस्य संस्कृत–विभागाचार्येण किञ्च भाषासङ्कायाधिष्ठात्रा कविवर्येण 'अभिराज' डा० राजेन्द्रमिश्रेण वसन्ततिलकानिबद्धम् 'आशीर्वचनं' वितीर्णम् । तदपि अर्वाचीनकविमालातः पूर्वं प्रकाश्यते ।

अस्मिन्नङ्के अपरं किञ्चित्प्रकायितुमवसरो नास्ति । विंशवर्षीये प्रथमेऽङ्के देववाणी–परिषद्वार्ता, संस्कृतजगद्वार्ता, नवप्रकाशनचर्चा, 'भवतां पत्रम्' इत्यादयः स्तम्भा अन्याभी रचनाभिस्साकं प्रकाशयिष्यन्ते ।

रमाकान्तशुक्लः

१५.१०.१९९७ (रमाकान्त शुक्लः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

माता शिशुश्च

(प्रणेता : श्रीसुन्दरराजः)

माता काचन शिशुना साकं याता पाथोनिधितटभूमिम्।
वातेनाम्बुधिपृषतवहेन शीतां सेवितुमुत्सुकभूता ॥1॥

तीरे नीरक्लिन्ने सिन्धोः क्रीडितुमाग्रहमतनुत बालः।
वात्सल्येन कटेरवरोप्य जननी भूमौ तं विससर्ज ॥2॥

लघ्वी लहरी जलधिरशान्तः मन्ये क्रीडितुकामशिशुना।
सर्वो हीच्छति तेन विहर्तुम् इति विस्रब्धा माता तस्थौ ॥3॥

याते सकलजनेऽथ तटेऽब्धेः जाते विजने विजिहीर्षन्तम्।
प्रेम्णा माता तन्निकटस्था पश्यन्त्यभवद्वात्सल्येन ॥4॥

नीरवभूता नीरधितीरे दृढविश्वासाऽर्णवसौजन्ये।
जलनिधिना सह संलापं सा तन्वन्त्यासीदन्तरिवैवम्॥5॥

पारावार त्वमकूपारो वारां गाधेतरनिधिरेकः।
तीरे पुलिने तव मे वत्सः नीरक्लिन्ने क्रीडति मुग्धः॥6॥

कूले लोले तव कल्लोले खेलति बालो लीलाशीलः।
त्वं संकोचय वीचीनिचयं क्षणकालाय भवास्य वयस्यः॥7॥

भीषय मा तं भीमतरंगैः लालय लघ्वीभिर्लहरीभिः।
भावयतेऽयं स्नेहमयं त्वां प्रलयंकरतां तव नावैति॥8॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अवकिर शंखै रत्नैर्मणिभिः शुक्तिभिरपि तं मौक्तिकिनीभिः।
नक्रतिमिंगिलयादांसि त्वं नियमय समये तिष्ठ निजान्तः।।9।।

कोमलमतिमतिमृदुलं बालं ताडय मा त्वं वीचीहस्तैः।
मृदुना करयुगलेन मयाऽयं लालितपालित इति जानीहि।।10।।

तटभुवि पुलिनैस्सलिलक्लिन्नैः पश्य स निर्मात्येकं भवनम्।
किसलयमृदुना करयुगलेन कुरुते मुदितः करयोस्तालम्।11।

अविरतचञ्चलवीचिकरेण भङ्क्षे भवनं हा त्वं तस्य।
स पुनर्यतते रचयितुमन्यत् तदपि तरंगैर्भङ्क्षे भूयः।।12।।

बलवीर्याकृतितेजस्सत्त्वैस्त्वमसि समुद्र महान् स क्षुद्रः।
किं न त्रपसे क्लमयन्नेवं तं रचनात्मककर्मणि सक्तम्।।13।।

अथ वा मन्ये स्थविर इवैकः शिशुना विहरसि वात्सल्येन।
विहसन्नेवं फेनसितेन मुखरेण त्वं नीतिमुखेन।।14।।

मा नय मम शिशुमेनं दूरं मानय मामकनुरोधं भोः।
इत्थं वीच्या शिशुमाकृष्टं दृष्ट्वा हन्त जनन्याऽऽक्रुष्टम्।।15।।

अर्भकमर्णवकबलितमेवं रक्षितुमापतितां तस्याम्बाम्।
तामपि कबलीकृत्य पयोधिस्तिष्ठति गर्जन् पूर्ववदुच्चैः।।16।।

करुणाहीनं सुन्दरराजः करुणं बालेऽप्यस्य जनन्याम्।
वरुणालयकृतमालोच्यैतत् करुणं काव्यं कलयांचक्रे।।17।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आशीर्वचनम्

श्रीशारदाऽऽत्मकरपङ्कजयुग्मसेकै–
र्वाक्तत्त्वचन्दनरसाञ्चितकान्तकायः।
कर्णाटभूश्रुतिहरिन्मणिकर्णपूरो
जीव्याच्चिरं जगति कोऽपि स रङ्नाथः।।1।।

यल्लेखनीमुखमनारतमेव सूते
सिन्धुप्रमन्थजनिताऽमृतबन्धुकल्पम्।
काव्यामृतं सपदि कोविदवृन्दपेयं
तापत्रयोन्मथनशक्तममर्त्यसिद्धम्।।2।।

क्वासौ त्रयी तपसि भास्वति मन्त्रपूता
शास्त्राणि दर्शनपराणि कुतश्च तानि!
आनन्दनिर्झरगृहं क्व नु काव्यजातं
श्रीरङ्गनाथहृदि किन्त्वखिलं प्रसक्तम्।।3।।

वाग्मी विनीतवचनो विनयी कृतज्ञो
वृद्धोपसेवनपरो गुणिवृन्दधुर्यः।
स्वाध्यायदीपिततनुः स्मितमेदुरास्यो
भूयाद्यशस्विमहितो ननु रङ्गनाथः।।4।।

प्रोन्मथ्य नव्यसुरवाक्कृतिजातसिन्धुं
स्वाधीतिवासुकिगुणैर्मतिमन्दरेण।
विद्योतयन् किल गवेषणरत्नजातं
स्वैरं चकास्त्यनुजको मम रङ्गनाथः।।5।।

स्वाधीनतोत्तरयुगाश्रितदूतकाव्यं
गोष्ठीप्रशंसितमहाकविकाव्यजातम्।
संश्रित्य किञ्च महिलाकविसम्प्रदायं
कृत्यं कृतन्नु समुदाह्रियतेऽद्य यस्य।।6।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यस्योद्यमैर्विबुधवाक्प्रविभात्यनल्पं
स्थेमानमञ्चितवती भुवि सुप्रतिष्ठा।
आशीर्वचोभिरभिनन्दति सन्ततं तं
मिश्रोऽभिराजपदभाक् प्रियरङ्गनाथम्।।7।।

सत्यव्रतोपकृतिसक्तमना मनस्वी.
सम्भाव्य रामकरणं स्तवनैस्तदीयैः।
सम्प्रत्यनेककविकाव्यगुणानुवादै-
रात्मानमञ्जयति शंसितरङ्नाथः।।8।।

एवंविधा यदि भवन्तु बुधा युवानो
विद्याऽम्बुधिप्रणयिनश्शफरोपमानाः।
निश्चप्रचं भगवती धृतकच्छपी सा
यायात्पुराणगरिमाणमनिन्द्यकीर्तिः।।9।।

नेयं प्रशस्तिपदवी सुलभा कवीनां
नाऽपि प्रसादनपरो विलसत्प्रयासः।
ज्येष्ठाग्रजस्य शुभभावयुतेयमाशी-
र्नूनं कनिष्ठसहजातकृतेऽल्पशब्दा।।10।।

आयुष्यमङ्गलमहोत्सवभूरिसौख्य-
स्वाध्यायसंवलितजीवनमस्य पूतम्।
श्रीरङ्गनाथसुधियो बुधवृन्दभाजो
भूत्यै गिरां दिविषदां तनुतेऽभिराजः।।11।।

मिश्रोऽभिराजराजेन्द्रः श्यामलानगरस्थिते।
विश्वविद्यालये रम्ये संस्कृताऽचार्यतां दधत्।।12।।
अधिष्ठातृपदारूढो भाषासङ्कायवर्त्मनि।
रङ्गनाथं शुभाशीर्भिर्लालयत्यात्मसोदरम्।।13।।

शिमला
15.10.97

सप्रणयम्
मिश्रोऽभिराजराजेन्द्रः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीसम्पटूरु–रंगनाथ–प्रणीता

अर्वाचीनकविमाला

१. ओगेटि परिक्षित् शर्मा

१. परिक्षिन्नामविख्यातः कस्य न श्रुतिगोचरः ।
रसिकास्वाद्यकृतिभिः यस्य कीर्तिर्ध्रुवायते ।।

२. आंध्रदेशे विराजंत्यां गर्तपुर्यां सुमण्डले ।
स्वर्णपुर्यां प्रसिद्धायां भवनारायणालये ।।

३. शैशवेऽभ्यस्तवान्कामं सप्तवर्षाणि संस्कृतम् ।
सत्यनारायणस्यान्ते गुरोर्गीर्वाणशास्त्रिणः ।।

४. पश्चाद् गोदावरीतीरे सांध्रगीर्वाणमन्दिरे ।
गोपादक्षेत्रे संपन्ने चाप्परायस्य सन्निधौ ।।

५. अधीतस्तु दृढं तत्त्वं आंध्रगीर्वाणभाषयोः ।
गुरूणां तत्त्ववेतृणाम् उपदेशेन दीक्षितः ।।

६. पत्नी च शीलवृत्तास्य शीलानाम्नी महासती ।
कर्त्तव्यनिष्ठा सच्छीला विद्यालंकारभासिनी ।।

७. यशोधरा महाकाव्यात् कालिदासपुरस्कृतिं ।
प्रतापराणायनाच्चापि अकादम्याश्च गौरवम् ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

८. लब्धवान् कविवर्योऽसौ सम्यक्शास्त्रप्रसन्नधीः।
शतानि ग्रन्थरत्नानि विदुषः कृतिसन्ततिः।।

९. ललिताकाव्यलहरी गीतिकाव्यप्रबोधिनी।
सौन्दर्यस्य च मीमांसा चक्रं नाटकसम्पदः।।

१०. तस्यानुजः पण्डितश्चाच्युतरामाभिधो बुधः।
नाटकं स्नेहबन्धाख्यं विदुषाऽनेन निर्मितम्।।

२. रा. गणेशः

१. प्रणमामि सुहृद्वर्यं गणेशं मितभाषिणम्।
शतावधानकुशलं निष्णातं चित्रकर्मणि।।

२. कर्ताऽसौ यदुवंशस्य महाकाव्यस्य बुद्धिमान्।
अन्वेषणाभिधं काव्यं सूच्यांशस्य प्रयोजकम्।।

३. यस्य वै विद्यते भक्तिः श्रीकृष्णपरमात्मनि।
तदर्थं रचितं येन श्रीकृष्णलहरीस्तुतिः।।

४. छन्दोभिर्विविधैः रम्या या साम्बलहरी स्तुतिः।
प्रणीता येन कविना स कविः केन वर्ण्यताम्।।

५. जाता शकुन्तला काव्यम् अभिज्ञानशकुन्तलम्।
स्पर्धते ललितैर्भावैः पदैश्च मधुरैः शुभैः।।

६. तच्छांकरविवेकीयं द्विसन्धानात्मिका कृतिः।
अन्तःकान्तिः तथा यत्र विवेकानन्दवर्णना।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

७. षण्णां ऋतूनां महिमा ग्रामेषु नगरेष्वपि।
यथा विलोक्यते लोके तथान्यत्काव्यमीरितम्।।

८. चित्रकाव्यस्य रचने निष्णातोऽसौ महाकविः।
नैपुण्ये तस्य विज्ञस्य दृष्टान्तश्चित्रचूलिका।।

९. तंत्रशास्त्रे सुरगिरि संङ्गीते चित्रकर्मणि।
शीघ्रं कवित्वं विख्यातो कर्णाटे सकलैः श्रुतः।।

१०. राज्योत्सवप्रशस्तौ च सर्वकारेण सत्कृतः।
भारतीयेऽद्य विद्याभवने कार्यकृत्सदा।।

११. नित्यसंध्याविधिर्नित्य–स्तुतिश्चेतिद्वयं कृतम्।
धूमदूताभिधं चेति कर्णाटगिरिविश्रुतम्।।

३. रामकिशोरमिश्रः

१. आर्. के. मिश्र–महाभागो शूकरक्षेत्रसम्भवः।
कालिदास–जगन्नाथ–भारविभ्यः प्रभावितः।।

२. षोडशे वत्सरे चास्य कविताचातुरी बभौ।
दृष्टा संस्कृतसाकेते दिव्यज्योतिषि च स्फुटम्।।

३. विद्योत्तमाकालिदासीयमितिकाव्यं स्तुतं बुधैः।
गीतिकाव्यप्रणयने कवेरस्ति परिश्रमः।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

४. सबालचरितं रम्ये गेयकाव्ये विलोक्यते।
छन्दःकलावती नाम छन्दोग्रन्थोऽस्य राजते।।

४. एन्. रङ्गनाथ शर्मा

१. प्राध्यापको भूतपूर्वः शब्दशास्त्रस्य राजते।
राज्यराष्ट्रपुरस्कारैः वैदुष्येन विभूषितः।।

२. एकचक्राङ्कितं बाहुबलिर्विजय इत्यपि।
रूपकद्वयमेतेन शंसनीयं विभाव्यते।।

३. येन रामायणं कृत्स्नं वाल्मीकीयमनूदितम्।
कर्नाटभाषया रम्यं सज्जनैश्च प्रशंसितम्।।

४. तथा विष्णुपुराणं च व्यासतात्पर्यनिर्णयः।
श्रुतिसारसमुद्धारो तोटकार्यस्य धीमतः।।

५. महाभागवतं चेति संस्कृते ग्रन्थसञ्चयः।
इत्यादिकृतिजातं तु कर्णाटेऽनूदितं स्फुटम्।।

५. हरिदत्त शर्मा

१. विश्वविद्यालये धीमान् प्रयागस्थे प्रवाचकः।
हरिदत्तः प्रशंसार्हः संस्कृते शुभ्रकीर्तिमान्।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

२. बालानां सुखबोधाय गेयकाव्यं विनिर्मितम्।
गीतालिनामकं येन बाला उद्बोधिता भृशम्।।

३. मनोरमा त्रिपथगा नाटकत्रयभूषिता ।
एकाङ्कमिलितास्तस्य गंङ्गा त्रिपथगा यथा।।

४. खण्डकाव्यं चोत्कलिका कविता तेन निर्मिता।
मनोज्ञैः काव्यसन्तानैः कीर्तिरस्य स्थिरा खलु।।

५. शर्मण्यभाषाविज्ञोऽसौ रष्यन्भाषाकृतश्रमः।
एवं विविधभाषाभिः सफलं तस्य जीवितम्।।

६. जग्गू वकुलभूषणः

१. साहित्यशास्त्रमर्मज्ञः कविकैरवचन्द्रमाः।
विद्यासुधानिधिः श्रीमाँज्जग्गूवकुलभूषणः।।

२. लक्ष्म्याः परमभक्तोऽसौ श्रीमन्नारायणस्य च।
धार्मिकः सत्यसंधश्च ज्ञानामृतपयोनिधिः।।

३. चतुर्विंशतिसंख्यानां नाटकानां महाद्युतिः।
लघुकाव्य–महाकाव्य–निर्माणे बद्धकौतुकः।।

४. अष्टादशे वत्सरेऽयं बाणकादम्बरीसमाम्।
निर्ममे महितप्रज्ञो गद्यकाव्यं जयन्तिकाम्।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

५. यदुशैलं समुद्दिश्य चम्पूकाव्यं मनोहरम्।
रचयामास मेधावी नारायणकथाश्रयम्।।

६. लक्ष्मीनृसिंहमुद्दिश्य सुप्रभातं यशस्करम्।
भक्तिमान् रचयित्वाऽसौ यशः स्थापितवान्भुवि।।

७. इत्यादि कृतिरत्नानि निर्मितानि मनीषिणा।
राष्ट्रराज्यपुरस्कारैः अलंकारोऽस्य शोभते।।

७. बसवराजशास्त्री

१. गुरुपादार्यसद्वंशे मुक्तामणिरिवामलः।
रुद्रमूर्तिसुतो धीमान् संङ्गमाम्बातनूभवः।।

२. पुत्रोऽष्टमो लिङ्गिनिष्ठस्सदाचारपरायणः।
शास्त्री बसवराजोऽयं शिवाद्वैतविशारदः।।

३. अध्यक्षः सर्वमान्योऽयं बिजापुरबृहन्मठे।
विजयः सिद्धलिङ्गस्य महाकाव्यतया स्तुतः।।

४. करडीशस्य विजयो चम्पूरूपेण निर्मितः।
अनेन कविना बाढं कीर्तिरस्य कवेर्ध्रुवा।।

५. न्याये व्याकरणे चैव तथा साहित्यसंज्ञके।
अलंकारे महाप्राज्ञः करडीशो जयत्यसौ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

८. वासुदेवकृष्ण चतुर्वेदी

१. खौनीति नाम विदिता जननी तदीया
नूनं कुटुम्बतिलकं प्रथिता नगर्याम्।
पंचात्मजा गुणवती सुतयापि युक्ता
पौत्रप्रपौत्रमुखदर्शनलब्धभाग्या।।

२. गोपालवासुदेवौ च प्रकाशश्च यथाक्रमम्।
भ्रातरौ रामकृष्णश्च रमाशंकर इत्यपि।।

३. स वासुदेवः पित्रैव पाठितः शास्त्रसंचयम्।
शास्त्रं व्याकरणं नव्यं न्यायशास्त्रं सधर्मकम्।।

४. श्रीमद्भागवतं पुण्यं पौरोहित्यं यथाविधि।
ज्योतिश्शास्त्रं च वेदान्तं वेदाङ्गानि समान्यपि।।

५. कविताशक्तिरुद्भूता परमानन्दशास्त्रिणाम्।
कृपया परमोदार–मञ्जुला च सचेतसाम्।।

६. आचार्यपदवी लब्धा शास्त्रेषु किल सप्तसु।
महाकाव्यं संप्रणीतं द्वारकाधीशनामकम्।।

९. एच्. वि. नारायणशास्त्री

१. साहित्यशास्त्रे प्राचार्यः शास्त्री नारायणो बुधः।
नैकनाटककर्ताऽसौ कविशेखरकीर्तिभाक्।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१. महाकाव्यद्वयं तस्य ज्योतिःशास्त्रविशारदः।
वेदाध्यायी सदा कर्म शास्त्रप्रोक्तं करोत्यपि।।

२. कर्णाटभाषावैदग्ध्यं कौशलं हास्यकर्मणि।
राज्योत्सवप्रशस्तिश्च प्रथयन्त्यस्य वैदुषीम्।।

१०. के. एस्. नागराजन्

१. महाकाव्यस्य निर्माता खण्डकाव्यस्य लेखकः।
कर्ताऽपि स्तोत्रकाव्यस्य नाटके च कृतश्रमः।।

२. अद्वैतवेदान्तरतः मातृसेवापरायणः।
गणिते ज्योतिषे विज्ञः भाषान्तरकलास्वपि।।

३. कविभूषणसाहित्यालंकारोपाधिमण्डितः।
नव्यविज्ञानशास्त्रेऽपि पदवीं लब्धवान्कविः।।

४. इति ख्यातो नागराजः शेषनारायणः सुतम्।
प्राप्तवान्तनयः सोऽयं वैद्यशास्त्रे विलक्षणः।।

११. अरैयर् श्रीराम शर्मा

१. पुण्यक्षेत्रे मेलुकोटे नाम्नि विख्यातबुद्धिमान्।
अरैयर् रामशर्माख्यः प्रांशुपालपदे स्थितः।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

२. तर्कालंकारमर्मज्ञः शब्दशास्त्रे कृतश्रमः।
पञ्चस्वपि च भाषासु काव्यनिर्माणकोविदः।।

३. श्रीरामानुजचारित्र्यमस्मच्चम्पूरितिश्रुतम्।
प्रणीतं कविनानेन काव्यं करपटी तथा।।

४. कवितानिपुणः प्राज्ञो सम्भाषणकलाधरः।
सर्वदा मधुराभाषी विनीतो वाक्यकोविदः।।

१२. रेवाप्रसाद द्विवेदी

१. विश्वविद्यालये काश्यां प्राध्यापकपदे स्थितः।
रेवाप्रसादो विख्यातः द्विवेदी काव्यनिर्मितौ।

२. प्रणीतं कविनानेन सीताचरितनामकम्।
साहित्यसंस्थया (अकादमी) तस्य प्रशस्तिरपि दापिता।।

३. समग्रकाव्यान्येतेन कालिदासमहाकावेः।
सम्पादितानि विदुषा श्लाघ्यानि बुधसंसदि।।

४. शेक्स्पियर्नामविख्यातकवेरस्त्यांग्लरूपकम्।
परिवर्तितमेतेन यूथिकाभिधया पुनः।।

१३. रसिकविहारी जोशी

१. रसिकविहारी जोशी दिल्लीनगरे महाप्राज्ञः।
करुणाकटाक्षलहरी रचिता येन मनोहरा जयति।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

३. मोहभङ्गमहाकाव्यं विवेकानन्दवर्णनम्।
प्रणीतं विदुषाऽनेन मनोज्ञं सर्वसंस्तुतम्।।

४. विश्वविद्यालये दिल्ल्यां प्राध्यापकपदे स्थितः।
निवृत्तो मेक्सिकोदेशे संस्कृताध्यापने रतः।।

५. प्यारिस्नगरनिष्ठस्तु विश्वविद्यालयः पुनः।
डीलिट्पदव्या धीमन्तं भूषयामास तं कविम्।।

१४. रमाकान्त शुक्लः

१. देववाणीपरिष्कर्ता हिन्दीभाषाविशारदः।
राजधान्यां रमाकान्तो राजते विबुधोत्तमः।।

२. "अर्वाचीन" प्रपूर्वा तु संस्कृताभिधपत्रिका।
प्रकाश्यते तेन विदुषा गीर्वाणीहितकाम्यया।।

३. अस्ति पण्डितराजीयं तथा "मे भाति भारतम्"।
काव्यद्वयं रम्यतमं कविनाऽनेन निर्मितम्।।

४. हिन्दीप्राध्यापकेनापि सेविता सुरभारती।
साहित्याचार्यपदभाक् आचार्यः सांख्ययोगयोः।।

५. "वाणीविहार"वासित्वं सार्थकम् विदुषा कृतम्।
शुक्लः श्रीमान् रमाकान्तः कस्य न श्रुतिगोचरः।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१५. हरिनारायण दीक्षितः

१. विश्वविद्यालये प्राज्ञो कुमायूनभिधे स्थितः।
प्राध्यापकः संस्कृतस्य नैनिताल्नगरे कविः।।

२. भीष्मस्य चरितं नाम महाकाव्यं व्यरीरचत्।
मनोज्ञं हनूमद्दूतं खण्डकाव्यं व्यधात्पुनः।।

३. रूपकाणि च तेनैव विदुषा पञ्चषाण्यपि।
स्तुतयो भक्तिपूर्णाश्च देवतानां लिलेख सः।।

४. साहित्यशास्त्रे विख्याते सांख्ये व्याकरणेऽपि च।
आचार्यपदवीं प्राप्य शिष्यानध्यापयन्बुधः।।

१६. इच्छाराम द्विवेदी

१. प्रणवाभिधेन विख्यात–काव्यनाम्ना विराजते।
विद्यालये मैनपुर्या एकोरामाभिधे पुनः।

२. चरितं वामनस्यासौ महाकाव्यं विनिर्ममे।
स्वयं पौराणिको भूत्वा साहित्ये रसिकः पुनः।।

३. दूतकाव्यद्वयं रम्यं गीतमन्दाकिनी तथा।
बालगीताञ्जलिं किञ्च काव्यानि प्रणिनाय सः।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

४. सुरभारती–महासंस्था सचिवोऽयमतन्द्रितः।
पटुः प्रवचने कार्ये भाति विद्वत्प्रियः कविः।।

१७. नलिनी शुक्ला

१. प्रचार्या कान्पुरे रम्ये विश्वविद्यालये सती।
भावाञ्जलिनिर्झरिणी–गीतकाव्ये विनिर्ममे।।

२. स्तोत्रं च वाणीशतकं योगशास्त्रे महाकृतिम्।
प्रणीयोत्तरदेशीयप्रशस्तिं चाप्यविदन्त।।

१८. वनमाला भवाल्कर्

१. सागरीये विश्वविद्यालये प्राध्यापिका कविः।
नाटकं पाददण्डाख्यं प्रणीयोऽज्वलकीर्तिभाक्।।

२. पार्वतीपरमेशानौ राघवस्य विवासनम्।
उद्दिश्य कवयित्र्या द्वे निर्मिते नृत्यरूपके।।

३. महाभारतमाधृत्य प्रबन्धं चापि निर्ममे।
भक्त्या च सायिबाबस्य स्तोत्रं चापि कृतं तया।।

४. लब्धा तिरुमलाम्बायाः प्रशस्तिर्बुधसंसदि।
बेंङ्गलूरुपुरे दत्त एन्केआर्विसंस्थया।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

२०. पुष्पा दीक्षित

१. कन्यकानामविख्यात–महाविद्यालये पुरा।
प्रचार्यया विप्रलम्भकाव्यमग्निशिखाभिधम्।।

२. प्रणीतं चाशुकवितानिर्माणेऽसौ विशारदा।
पाणिनीये महाशास्त्रे लब्धाचार्यपदाप्यसौ।।

२१. हर्षदेव माधवः

१. पितृसौख्याद्वंचितोऽसौ आसीद्बाल्ये पुराऽनघः।
अमदाबादनगरे प्राध्यापकपदे स्थितः।।

२. गुजरातीसंस्कृतयोः कवितायां विशारदः।
पत्रिकासु विभिन्नासु सहस्रद्वितयाधिकाः।।

३. श्लोकाः अनेन कविना देववाण्या प्रकाशिताः।
चित्रकर्मणि निष्णातो गुजरातीविनिर्मितान्।।

४. संस्कृते परिवर्त्याऽसौ शुभ्रकीर्त्या विराजते।
परिवृत्ता अमी श्लोकाः जपानीचैनभाषयोः।।

२२. श्रीभाष्यं विजयसारथिः

१. आंध्रप्रदेशे चेर्गुर्ती–ग्रामे लब्धजनिः सुधीः।
कलाविद्यालये संप्रत्यध्यापकपदे स्थितः।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

२. वारंगल्नाम्नि नगरे गीर्वाणीमुपसेवते।
बहूनां खण्डकाव्यानां स्तोत्राणां संचयस्य च।।

३. कथानां च मनोज्ञानां निर्माता नाटकावलेः।
राष्ट्रप्रेमपुरस्कर्त्री रम्या भारतभारती।।

४. शब्दार्थचित्रसंदृब्धा रसिकानां मनोहरा।
दिल्लीसाहित्य(अकादमी)संस्थायाः प्रशस्तिं लब्धवत्यसौ।।

५. प्रेक्षावानांध्रभाषायां नाम्ना विजयसारथिः।
लब्धप्रशस्तिरांध्रीय–ख्यातसाहित्यसंस्थया।।

२३. राधावल्लभ त्रिपाठी

१. सागराख्यपुरे विद्यालये प्राध्यापकः कविः।
प्रसिद्धान्यस्य काव्यानि लहरीदशकं तथा।।

२. रागकाव्यं मनोहारी नाटकानि बहून्यपि।
प्रबन्धः षोडशीनामा संदृब्धो विदुषा पुनः।।

३. अधुनातनकाव्यानां सविमर्शगुणग्रहः।
मध्योत्तरप्रदेशाभ्यां प्रशस्त्या संविभूषितः।।

४. शर्मण्यदेशेनाहूतः सोऽयं प्राध्यापको बुधः।
नाट्यशास्त्रं च येनाऽद्य तेन हिन्द्यामनूदितम्।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

५. संपादकः सागरिकापत्रिकाया विराजते।
येनाधुनिकसाहित्यं पक्षत्वेन नियोजितम्।।

२४. केशवचन्द्रदाशः

१. विश्वविद्यालये पुर्यां न्यायशास्त्रस्य बोधकः।
प्राज्ञः शास्त्रे च काव्ये च निर्माता ग्रन्थसन्ततेः।।

२. विपुलः ग्रन्थकर्ताऽसौ कथासाहित्यदिग्गजः।
श्लोकानां ललितानां च कर्ताऽयं लीलया कविः।।

३. "विद्वन्मणिश्च" विदुषा ख्याता "तंत्रसरस्वती"।
इत्युपाधिद्वयं तेन लब्धं विख्यातकीर्तिना।।

४. पारङ्गतो व्याकरणे हिन्द्यां रत्नं जयत्यसौ।
यो विश्वकविरित्येवं प्रसिद्धो जनसंसदि।।

५. भाषाशास्त्रे च निष्णातो रष्याशर्मण्यभाषयोः।
शिशुसाहित्यनिर्माता भाषान्तरकृतश्रमः।।

२५. राजेन्द्र नानावटी

1. प्राध्यापकपदे दक्षः क्षेत्रे तस्मिन्वटोदरे।
मरीचिका नाम काव्यं रचयित्वा विराजते।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

२. मनोहारि च तत्काव्यं विद्वद्भिश्च प्रशंसितम्।
यस्य प्रशस्तिर्गुजरात्प्रान्तसाहित्यसंस्थया।।

३. दर्शनानां च बौद्धानां पालीप्राकृतभाषयोः।
तेन प्रबन्धाः रचिताः विषयेष्वांग्लभाषया।।

२६. डा. रामकरण शर्मा

१. वन्देऽहं देहलीरत्नं वन्देऽहं मितभाषिणम्।
वन्देऽहं रामकरणं वन्दे प्राचार्यपुङ्गवम्।।

२. विश्वविद्यालये पूर्वं सम्पूर्णानन्दनामके।
अभूत्कुलपतिः नैकविद्यया लोकविश्रुतः।।

३. अथ निर्देशकः सोऽभूत् संस्थाने राष्ट्रिये तथा।
केन्द्रीयसर्वकारेऽभूदधिवक्ताऽवशिक्षणे।।

४. अनेककाव्यनिर्माता पदवीभिर्विभूषितः।
शब्दशास्त्रे तथा सांख्ये न्याये पण्डिततल्लजः।।

५. वेदवेदान्तनिष्णातोऽलंकारे पण्डितोत्तमः।
विद्याविनयसंपन्नः सदाकार्यरतः सुधीः।।

६. कोलंबियाविश्वविद्यालयसम्बन्धिशिक्षणे।
अभ्यागताचार्यपदे नियुक्तो विद्वदग्रणीः।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

७. अन्ताराष्ट्रियगीर्वाणीसंस्थाध्यक्षोऽभवत्तथा।
संध्याशिवशुकीयादिकाव्यजातं च निर्मितम्।।

८. तदीयं सर्वमभ्यस्तं संतुष्टेन हृदा मया।
सीमारयीशनाम्नी च गद्यकाव्ये मनोहरे।।

९. आंग्लवाण्या मयापूर्वं यथावत्परिवर्तितम्।
सोऽयं महामना भूयात् दीर्घायुः कृपया हरेः।।

२७. सत्यव्रत शास्त्री

१. पूज्यं सत्यव्रतं वन्दे, वन्देऽहं गुरुतल्लजम्।
वन्देतं देहलीरत्नं, वन्देऽहं भूरि नित्यशः।।

२. विनयज्ञः नयज्ञश्च, वाचासौ वाक्पतेः समः।
लेखनेन गणेशोऽसौ, कार्येऽसौ निरतः सदा।।

३. आसीत्पूर्वं थायिभूमौ, भारतस्य कलानिधिः।
तत्र वै रचितो येन, थाइदेशस्य वैभवम्।।

४. किंचिदासीच्च मत्पुण्यं, तस्य संवीक्षणावहम्।
गते सितेंबरे मासे, एकविंशतितारके।।

५. पितृच्छायापालितोऽसौ, आसीद्बाल्ये पुराऽनघः।
इदानीं तु नियुक्तोऽसौ, विदुष्या योषया सह।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

६. बोधिसत्त्वस्य चरितम्, इन्दिराचरितं तथा।
रामकीर्तिमहाकाव्यं, निर्ममे विबुधोत्तमः।।

७. प्रथितं पत्रकाव्येन, विदुषां तुष्टिदेन तम्।
सत्यव्रताख्यं वन्देऽहं, प्राध्यापककुलोत्तमम्।।

८. यस्य वै विमला कीर्तिः, सर्वत्राकर्ण्यते सदा।
यस्य वै प्रथिता बुद्धिः, घुष्यते विद्वदुत्तमैः।।

९. सदा वात्सल्यपूर्णोऽसौ, सदा स्नेहकृपामयः।
सदैव विदुषां वंद्यः, जीवेत्स शरदां शतम्।।

१०. शर्मण्यदेशवासी प्राक्, भारतस्य कलानिधिः।
तत्रैव काव्यं ग्रथितं, तद्देशस्तवनात्मकम्।।

११. सक्तं प्रबन्धरचने, सक्तं सन्मार्गदर्शने।
सत्यव्रताख्यं तं वन्दे, स्मितपूर्वाभिभाषिणम्।।

१२. वेदवेदान्तनिष्णातः, नीतिशास्त्रपरायणः।
न्यायव्याकरणोर्वीन्दुं, वन्देऽहं भूरि नित्यशः।।

१३. शर्मण्यबेल्जियं देशौ दृष्टवन्तं मनीषिणम्।
वासिनं केनडा देशे, नन्दयामोऽभिनन्दनैः।।

१४. यस्य स्मरणमात्रेण, जायते रोमहर्षणम्।
जगन्नाथे कुलपतिं, नुमः सत्यव्रताभिधम्।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१५. संस्कृतोज्जीवने नित्यमात्मानमर्पयन्मुदा।
संतुष्टः सुधया तृप्तो, देववद् भ्राजते महान्।।

१६. बहुभिः स्वर्णपदकैः, बुधेन्द्रोऽयं सभाजितः।
कालिदासेतिपदेन, भूषितश्च कविप्रियः।।

१७ क्वासौ सत्यव्रतो धीमान्, क्वासौ मन्दमतिर्युवा[१]।
पर्वते परमाणौ च, पदार्थत्वं प्रतिष्ठितम्।।

१८ सर्वदा कटिबद्धोऽसौ, अर्पितः संस्कृताय च।
स्वसमयं स्वशक्तिं च, स्वीयकार्ये कृतौ च यः।।

१९. क्वासौ देहलिवास्तव्यः, क्वासौ कल्याणपूःस्थितः।
विधिरेव बलीयांश्च, दक्षिणोत्तरमेलने।।

२०. न मया कृतं कवित्वं, यदाकदाचिदपि पूर्वम्।
केवलं लिखितं किंचित्, कुतूहलवशादिह।।

२१. क्षमन्तां कृपया दोषान्, स्वीकुर्वन्तु गुणांश्च मे।
हंसक्षीरप्रवादेन, अनुगृह्णन्तु नित्यशः।।

28. "अभिराज" राजेन्द्र मिश्रः

अस्ति प्राध्यापकः कश्चिद्, हिमाचलप्रदेशगः।
१. नाम्ना राजेन्द्रमिश्रोऽसौ, अभिराजीसुतः श्रुतः।।

---

१. रङ्गनाथः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

२. विनयज्ञः नयज्ञश्च, वाचा बृहस्पतिसमः।
लेखनेन गणेशोऽसौ, कार्ये निष्ठारतः सदा॥

३. "इक्षुगन्धस्य" काव्यस्य, महिम्ना यो सभाजितः।
साहित्याकादमीद्वारा, पुण्यभागी महाकविः॥

४. "जानकीजीवना"ख्यस्य, महाकाव्यस्य वैभवात्।
"वाचस्पति"पुरस्कारं लब्ध्वा यो यशसाऽन्वितः॥

५. "पराम्बाशतके" योऽसौ, पराम्बास्तावकः सदा।
पराम्बा पातु तं नित्यं, सदासूर्येन्दुतारकम्॥

६. वेदवेदान्तनिष्णातः, नीतिशास्त्रप्रचारगः।
न्यायव्याकरणज्ञश्च, वन्दे तं भूरि नित्यशः॥

७. यस्यास्ति सुदृढा प्रीतिः, संस्कृते संस्कृतौ तथा।
तद्भाषाशतकस्यापि, कर्ताऽसौ मानितो भुवि॥

८. पितृसौख्याद् वंचितोऽसौ, आसीद्बाल्ये पुराऽनघः।
इदानीं तु निषक्तश्च, मातृसेवापरायणः॥

९. दूतकाव्यस्य निर्माणे, प्रथितश्च महाकविः।
"मृगाङ्को दूत"रूपेण प्रथितः तत्र वर्णितः॥

१०. बेल्जियवासिशार्पेण संपर्कोऽस्य महाकवेः।
"पत्रसन्देश"चम्प्वा च स जातश्च महान्पुरा॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१०. द्वितीयं "तीर्थराजे"ति, चम्पूकाव्यं तृतीयकम्।
"चन्द्रशेखरचम्प्वा"ख्यं, प्रथितं च चतुर्थकम्।।

११. "देवेन्द्रचम्पू" नाम्ना च, पञ्चमं परमात्मनः।
जीवितावेदनपर"मभिराज" सुनामकम्।।

१२. इण्डोनेशियाभिधे राष्ट्रे, भारतप्रातिनिध्यतः।
गत्वा तत्राब्दयुगलं, महोपन्यासतत्परः।।

१३. ततः स्वदेशमायातः, चकारान्यत्कृतिं पराम्।
बालीद्वीपप्रत्यभिज्ञाज्ञापिकां शतकं परम्।।

१४. "श्रुतिम्भरां" च "मृद्वीकां" चकारान्यत्कृतिद्वयम्।
वामनस्यावतरणं विमानशतकं तथा।।

१५. धर्मानन्दस्य चरितं मातृकाशतकं तथा।
हिमाचलस्य शतकं तथाकिञ्चनकाञ्चनम्।।

१६. यस्य वै विमला कीर्तिः सर्वतः श्रूयते दिशि।
यस्य वै बुद्धिविभवः बुधैर्जोघुष्यते तथा।।

१७. तस्य राजेन्द्रमिश्रस्य कृपाकांक्षी पदे स्थितः।
अहं कृतिमहत्त्वं च दर्शं दर्शं प्रमोदितः।।

१८. एष राजेन्द्रमिश्रस्य मयि वात्सल्यदर्शकः।
सदा विबुधवंद्यश्च जीयाच्च शरदां शतम्।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१९. संस्कृतोज्जीवने नित्यमात्मानमर्पयन्मुदा।
संतुष्टः सुधया तृप्तो देववद्भ्राजते महान्।।

२०. वन्दे प्राध्यापकश्रेष्ठं वन्दे तं सुहृदां वरम्।
वन्दे नाटककारं च, वन्दे तं मार्गदर्शिनम्।।

२१. वन्दे तं भूरिकीर्तिं च, वन्दे तं शुभमानसम्।
वन्दे गौतमगोत्रं च, वन्दे दुर्गाप्रसादजम्।।

२२. देवेन्द्रः पूज्यते स्वर्गे, राजेन्द्रस्तु महीतले।
देवेन्द्रादप्यतितमां, शोभते यशसा दिशि।।

२३. क्वासौ राजेन्द्रमिश्राख्यः, क्वासौ मन्दमतिर्युवा।
पर्वते परमाणौ च, पदार्थत्वं प्रतिष्ठितम्।।

२४. क्वासौ सिमलावास्तव्यः, क्वासौ कल्याणपूःस्थितः।
विधिरेव बलीयाश्ंच, दक्षिणोत्तरमेलने।।

२५. न मया कृतं कवित्वं, पूर्वं यदा कदापि च।
केवलं लिखितं किंचित्, कुतूहलवशादिह।।

२६. क्षम्यतां विबुधैर्दोषः, गृह्यतां गुण एव नः।
हंसक्षीरनयेनापि, अनुगृह्णन्तु नित्यशः।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

२९. वि. राघवन्

१. महामना महाप्राज्ञो राघवन् संज्ञकः सुधीः।
विख्यातनामा साहित्ये सङ्गीते च कृतश्रमः।।

२. द्वादशस्विव सूर्येषु नाटकेषु विराजिषु।
तदीयेष्वन्यकाव्यानि नक्षत्राणीव लिल्यिरे।।

३. सङ्गीते सुप्रसिद्धो हि मुत्तुस्वाम्याख्यदीक्षितः।
प्रणिनाय महाकाव्यं तं प्रकल्प्यात्र नायकम्।।

४. सन्ति यत्र विभिन्नानि वृत्तानि विविधान्यपि।
कलाविदा राघवेण यत्र रागादि योजितम्।।

५. गीर्वाणवाणीप्रेमाऽसौ रंङ्गसंस्कृतपूर्वकम्।
नाटकाभिनयार्थं तु स्थापयामास कोविदः।।

६. संस्कृतप्रतिभानाम्नी पत्रिका तेन धीमता।
संपादिता प्राप कीर्तिं विदेशेष्वपि शाश्वतीम्।।

७. आंग्लभाषाप्रवीणोऽसौ काव्यमीमांसकान् शुभान्।
ग्रन्थान्प्रणिन्ये पाश्चात्त्या दृष्ट्वा यान्मुदमाप्नुवन्।।

८. कथा संस्कृतभाषायां राघवन्सुधिया पुनः।
रचिता रञ्जयन्तिस्म बालकान् पण्डितानपि।।

९. भारते सर्वकारेण वैदुष्यपरितोषिणा।
दत्ता प्रशस्तिः कवये पद्मभूषणनामिका।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

३०. विघ्नेश्वर शर्मा

१. पुण्यक्षेत्रे तु गोकर्णे लब्धजन्मा कविः सुधीः।
विघ्नेश्वरो वैदिकोऽपि प्रभुः काव्यादिनिर्मितौ।।

२. इन्दिरावैभवं नाम काव्यं रत्नाङ्गुलीयकम्।
नाटकं च प्रणीयासौ यशः शाश्वतमाप्तवान्।।

३. ज्योतिश्शास्त्रपरिज्ञाता कुशलो भाषणे तथा।
लेखने व्यवहारे च प्रसिद्धो विदुषां कुले।।

४. स्तोत्रादयोऽन्यकृतयः विपुला लिखिताः पुनः।
न प्रकाशं गता हन्त दौर्भाग्यं विदुषामिदम्।।

३१. अर्क सोमयाजी

१. आंध्रेषु प्रथितं विराजति पुरं गोदावरीतीरगं
श्रीमद्राजमहेन्द्रमित्यभिहितं यस्यान्तिंके वर्त्तते।
ग्रामः श्रीवलिचेरुनाम विबुधैर्देदीप्यमानश्चिरं
यत्रासीत्कविजन्म यत्र निगमा जीवन्ति चाद्यावधि।।

२. श्रीमद्वेंकटरामाख्यो ह्यग्रजोऽस्य महाकवेः।
योऽस्य बाल्ये श्रुतिस्मार्तविद्यामध्यापयन् स्वयम्।।

३. सीतारामाञ्जनेयाख्यं महाकाव्यं मनोहरम्।
मन्दाकान्ताभिधैर्वृत्तैः लिलेखायं महाकविः।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

३२. वट्टिपल्लि मल्लिनाथशर्मा

१. वट्टिपल्लि मल्लिनाथशर्मभिर्विनिर्मितम्
काव्यमेतदद्भुतम् गुरूपहारनामकम्।
कामकोटिसंयमीन्द्रचन्द्रशेखराऽनघ–
श्रीपदारविन्दयोस्समर्पितं विराजताम्।।

२. उपमोत्प्रेक्षामुख्यैस्सरसश्लेषोपलालितैर्मधुरैः।
सोऽयं गुरूपहारस्सद्गुरुपदभक्तिमेदुरो जयतात्।।

३. वेदवेदान्तयोर्विद्वान् सदाचारपरः कविः।
प्रणिनाय मनोज्ञानि स्तोत्राणि विविधान्यपि।।

३३. हित्तलहल्लि गोविन्दभट्टः

१. हित्तलहल्लि गोविन्दभट्टाख्याः कवितल्लजाः।
परावागनुसन्धान–प्रस्फुरद्वाग्विभूतयः।।

२. वाग्देवतानुग्रहभाजनेन गोविन्दभट्टाभिधपण्डितेन।
सर्वज्ञचम्पूर्ललिता निबद्धा गुणैर्गुरोः स्वस्य वशीकृतेन।।

३. सर्वज्ञचम्पूं जग्रन्थ प्रशान्तरसबन्धुराम्।
विचित्रैर्विविधैर्वृत्तैः नृत्यत्पदकदम्बकैः।।

४. स आशुकवितायां तु लब्धकीर्तिः व्यराजत।
सदाचारविनम्रश्च दैवभक्तः शुभोदयः।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

३५. के. टि. पाण्डुरङ्गी

१. वेदान्तशास्त्रनिष्णातो मीमांसकशिरोमणिः।
कृष्णाचार्यः पाण्डुरङ्गी कर्णाटककविर्महान्।।

२. विद्वत्सभाभूषणेन ललितैः पदविस्तरैः।
काव्याञ्जलिरपूर्वोऽयं प्रणीतस्तेन धीमता।।

३. पूर्णप्रज्ञाभिधे विद्या–पीठे कुलपतिः स्वयम्।
विराजते सदा विद्याविनोदेषु महायशाः।।

४. रवीन्द्ररूपकं नाम सर्वज्ञवचनं तथा।
रेडियोरूपकं चेति कृतिभेदा जयंत्यमी।।

३५. प्रशस्यमित्रशास्त्री

१. हास्यकाव्येषु निष्णातः व्यंग्यार्थव्यञ्जने कृती।
सुभाषितानां निर्माता प्रशस्यः कविपुङ्गवः।।

२. प्रशस्यमित्रो जयति कर्षन् सहृदयान्मुहुः।
ग्रथ्नन् कथासुमनसः रायबरेलीपुरे बुधः।।

३. बह्वीषु पत्रिकास्वस्य विभिन्नविषयेष्वपि।
प्रकाशितानि पद्यानि निरवद्यानि भूरिशः।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

३६. कृष्णलालः

१. विश्वविद्यालये दिल्ल्यां प्राध्यापकपदे स्थितः।
कृष्णलालो विजयते कथासाहित्यकृत्कविः।।

२. शशिकरनिकरं काव्यं शिञ्जारवनामकं मनोहारि।
एकाङ्कनाटकान्यपि ग्रथितान्येतेन धीमता बहुशः।।

३. हिन्द्यां गृह्यानि सूत्राणि सूक्तजातं श्रुतिष्वपि।
व्याख्यातानि विशेषेण प्रथयंत्यस्य सद्यशः।।

४. प्रशस्तिरुत्तरे राज्ये सर्वकारेण निर्मिता।
अनेन लब्धा विदुषा वैदुष्यस्य प्रकाशिका।।

३७. ओंप्रकाशठाकुरः

१. दिल्ल्यां गीर्वाणभाषायां ओंप्रकाशाख्यठाकुरः।
लब्धकीर्तिर्विजयते कविरत्नमिति श्रुतः।।

२. गीतमन्दाकिनी गीतगङ्गेन्द्रधनुरित्यपि।
गीतकाव्यानि रम्याणि तदीयानि विशेषतः।।

३. उल्लासयन्ति हृदयं रसिकानां पुनः पुनः।
साहित्याचार्यपदवी लब्धैतेन महात्मना।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

३८. पुल्लेल श्रीरामचन्द्रुडुः

१. हैदराबादनगरे संस्कृताध्यापने रतः।
आंध्रभाषाप्रवीणश्च पुल्लेलाभिजनः सुधीः।।

२. श्रीरामचन्द्रकविराट् निर्ममे स्तुतिमञ्जरीम्।
रूपकाणि तथा खण्डकाव्यानि विविधान्यपि।।

३. श्रीरामनाम्न्येष काव्ये कथास्तु विविधाः शुभाः।
संजग्राह मनोहारिभाषया चित्तहारिणीः।।

४. न्यायालंकारवेदान्त–शब्दशास्त्रेषु विश्रुतः।
चतुर्ष्वपि महाभागो विद्वन्मौलिषु राजते।।

५. हिन्द्यां गीर्वाणभाषायामांग्लानाञ्च वचस्स्वपि।
पण्डितो राष्ट्रपतिना प्रशस्त्या भूषितः कविः।।

६. संस्कृतग्रन्थराशिस्तु विदुषा परिवर्तितः।
आंध्राणां भाषया तेन प्रजानामुपकारकः।।

७. आंध्रप्रदेशविद्वत्संस्थया शंसितो बुधः।
दत्तप्रशस्तिर्जयति समाजे कृतिनां पुनः।।

३९. वि. सुन्दरशर्मा

१. हैदराबादनगरे पण्डितः सुन्दराभिधः।
स्तोत्राणां सप्तशतकं निर्मायाध्यविराजते।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

२. अलंकारशिरोमणिरांध्रसाहित्यकोविदः।
विश्वविद्यालये त्वेषः प्राध्यापकपदे बभौ।

४०. के. एस्. भास्करभट्टः

१. भीमनकोणे नामनि ग्रामे वसति भूसुरः।
कविः भास्करभट्टाख्यः संस्कृते कन्नडे सुधीः।।

२. वेदाध्यायी कविः ख्यातः काव्यनिर्माणकोविदः।
तरङ्गिणीं गुरुकृपापूर्वामेष विनिर्ममे।।

३. महाकाव्यसमानासौ रञ्जयन्ती बुधान्पुनः।
विराजते विशेषेण ललितैर्मधुरैः पदैः।।

४. भक्तिव्यञ्जकशब्दानां स्तोमैः सोमसमैः शुभैः।
रचितोऽप्यस्य जयति स्तवानां कुसुमाञ्जलिः।।

५. साहित्यभूषणं नाम प्रशस्तिर्विदुषा पुनः।
अनेनैवाशुकविना लब्धा पण्डितसंसदि।।

४१. बालगणपतिभट्टः

१. लब्धजन्मा शृङ्गगिरौ बालपूर्वाभिधः कविः।
भट्टो गणपतिः ख्यातः हिन्दीभाषाविशारदः।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

२. निर्माता संस्कृतगिरा देवतानां शुभैः पदैः।
स्तोत्राणां कन्नडगिरा लेखानां भूयसामपि।।

४२. रुद्रदेवत्रिपाठी

१. रुद्रदेवत्रिपाठीति प्रसिद्धः कविशेखरः।
बिर्लाशोधनसंस्थाया निर्देशकपदे स्तुतः।।

२. राजेन्द्रचन्द्रोदयनामचम्पूं
मनोहरां निर्मितवान्बुधेन्द्रः।
राजेन्द्रनाम्नश्चरितं तु यत्र
व्यावर्णितं राष्ट्रपतेः शुभोदयम्।।

३. पत्रदूतं पुत्रदूतं चेतिकाव्यद्वयं पुनः।
स्तोत्रकाव्यं गीतिकाव्यं रूपकाणि च निर्ममे।।

४. सुभाषितं खण्डकाव्यं योगसांख्यविशारदः।
पुराणकाव्यतीर्थाख्यमुपाधिं लब्धवानसौ।।

५. साहित्याचार्यपदवीं संप्राप्तोऽद्य विराजते।
विख्यातो विविधान् ग्रन्थान् हिंद्यामन्ववदत्सुधीः।।

४३. द्विभाषी सोमनाथशास्त्री

१. द्विभाषी ख्यातनामासौ बुधः शास्त्री महोदयः।
सोमनाथामिधोऽनन्तपुरे संस्कृतपण्डितः।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

२. चोलदेशे प्रसिद्धानां मनोहरकथावलीम्।
निर्ममे राजरत्नानां मालारूपेण कीर्तिमान्।।

३. विद्वान् संस्कृतशालायां रतोऽध्यापनकर्मणि।
स्तोत्राणि रचयामास देवतानां द्विजोत्तमः।।

४४. के. एस्. कृष्णमूर्तिशास्त्री

१. कृष्णमूर्त्यभिधः शास्त्री काञ्च्यां लब्धजनिः सुधीः।
मधुरापुरवास्तव्यो न्यायवेदान्तपारगः।।

२. अलंकारे लब्धकीर्तिः सतीचरितनामकम्।
महाकाव्यं सहृदयैः शंसनीयं प्रणीतवान्।।

३. तथैवर्तुविलासाख्यं खण्डकाव्यं मनोहरम्।
निर्माय शाश्वतीं कीर्तिं लब्धवान्राजते भुवि।।

४. अन्यानि स्तोत्रकाव्यानि प्रणीतानि मनीषिणा।
महामहोपाध्यायोऽपि शास्त्ररत्नाकरः कविः।।

५. मानितो राष्ट्रपतिनास्थानविद्वानिति स्मृतः।
मद्रासशासनेनासौ सर्वशास्त्रविशारदः।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

४५. जग्गू शिङ्गरार्यः

१. मेलुकोटे लब्धजन्मा प्रौढशालासु शिक्षकः।
जग्गू श्रीशिङ्गरार्योऽसौ प्रशस्तः कविशेखरः।।

२. यक्षःप्रश्न शौरिशौर्य तथैव शिबिवैभवम्।
कालिदास इव प्राज्ञो निर्ममे नाटकत्रयम्।।

३. यदुशैलाख्यचम्पूं च खण्डकाव्यं मनोहरम्।
चरितं तद्दाशरथेः संक्षेपेण विराजते।।

४. द्वयं काव्यकलापाख्यं विभिन्नकविताचयम्।
मानितो राष्ट्रपतिना प्रणिनाय यशोनिधिः।।

४६. पण्डरीनाथाचार्य गलगलिः

१. आचार्यः पण्डरीनाथः लब्धजन्मा बिजापुरे।
ललितैः मधुरैः शब्दैः कवितायां प्रशंसितः।।

२. श्रीकृष्णशतकादीनि विभिन्नशतकान्यसौ।
प्रणीय कीर्तिमानास्ते शम्भुलिङ्गजयाभिधाम्।।

३. चम्पूं तथा स्तुतिपराप्यन्यानि मधुराणि च।
काव्यानि विरचय्यासौ कीर्तिराशिमविन्दत।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

४. राज्यराष्ट्रप्रशस्तिभ्यां विबुधोऽसौ पुरस्कृतः।
लिलेख संस्कृतगिरा प्रबन्धान्विविधानपि।।

५. लेभेऽभिनवबाणाख्यमुपाधिं कविराडसौ।
न्यायवेदान्तविद्वांश्च शास्त्रवित्काव्यवित्सुधीः।।

४७. राल्लपल्लि अनन्तकृष्णशर्मा

१. अनन्तकृष्णशर्माख्यः गुणी विद्वान्कविः सुधीः।
आंध्रदेशे राल्लपल्लि–ग्रामजन्मा सुधीरसौ।।

२. आकृत्या वसचा गीत्या गुणेन च मनोहरः।
सङ्गीतशास्त्रे कुशलः रसज्ञो निपुणः कविः।।

३. मैसूरुजनपदादर्शं चम्पूकाव्यं मनोहरम्।
अनन्तभारतीं चापि प्रणिन्ये कविराडसौ।।

४. मैसूरूनृपास्थाने विद्वानिति पुरस्कृतः।
शीलवान्मधुराभाषी रेजे सज्जनपूजितः।।

४८. के. कृष्णजोयिस्

१. पण्डितप्रवरो विद्वान् कृष्णजोयिससत्कविः।
यथा शास्त्रे तथा काव्ये प्राज्ञः शुभगुणः सुधीः।।

२. कृतिं शरन्नवरात्रचम्पूं शब्दार्थबन्धुराम्।
कुम्भाभिषेकचम्पूं च प्रणीयाद्य विशोभते।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

३. बेङ्गलूरुपुरे रम्ये वेदान्ताध्यापकः शुचिः।
पुरस्कृतो राष्ट्रपतिना विभिन्नैश्च मठाधिपैः।।

४. वेदान्ते धर्मशास्त्रे च प्रबन्धान्विविधानसौ।
कर्णाटवाचा जग्रन्थ प्रजानामुपकारकान्।।

४८. श्रीधर भास्कर वर्णेकर

१. श्रीधरो भास्करो वर्णेकरिति प्रथितः कविः।
विश्वविद्यालये नागपुरे प्राध्यापको बभौ।।

२. शिवराज्योदयं नाम महाकाव्यं प्रणीतवान्।
येन सम्मानितो विद्वान् राष्ट्रसाहित्यसंस्थया।।

३. विवेकानन्दाभिधं दृश्यं काव्यमेतेन भाषितम्।
दशांकं येन संतुष्टाः सुरभाषाविदो जनाः।।

४. एवमन्यानि काव्यानि रम्याणि विविधानि च।
तदीयानि प्रकाशन्ते रसिकानां मुदे सदा।।

५. साहित्यवेदान्ताचार्यो तथा व्याकरणकोविदः।
एवं मराठीभाषायां राष्ट्रशक्त्याख्यपत्रिकाम्।।

६. सम्पादयति सारज्ञो विख्यातः पण्डितोत्तमः।
तथार्वाचीनसाहित्ये संस्कृते प्रथितां कृतिम्।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

७. मानितो राष्ट्रपतिना महाराष्ट्र्यां लिलेख सः।
एवमन्यान्प्रबन्धांश्च विलिख्यासौ विराजते।।

५०. एम्. रामकृष्णभट्टः

१. श्रीरामकृष्णभट्टाख्यो महाविद्वान्‌जायत।
माणेनामपुरे जातः विट्ठले प्राप्तवर्धनः।।

२. संस्कृते चांग्लभाषायां तथा कर्णाटगीर्ष्वपि।
बहुश्रुतोऽध्यापकश्च शालासु विविधास्वपि।।

३. आफ्रिकादेशमप्येष गत्वा वर्षद्वयं पुनः।
संस्कृतं बोधयामास तत्र जातान्बहून्पुनः।।

४. ज्योतिश्शास्त्रे व्याकरणे साहित्ये च धुरंधरः।
चरितं रचयामास शिवानन्दाख्ययोगिनः।।

५. तदुत्कृष्टं महाकाव्यं विभिन्नविषयेष्वपि।
काव्योद्यानं खण्डकाव्यं तत्प्रणीतं विराजते।।

६. संस्कृतां गिरमाश्रित्य भाषणे कुशलो ह्यसौ।
ज्योतिश्शास्त्रे बहून् लेखान् प्रणिनाय बुधाग्रणीः।।

७. उपाधिं प्राप्तवानेष विद्याभास्करनामकम्।
तस्मिन्विदुषि याथार्थ्यं यं मन्यन्ते जनाः पुनः।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

५१. पशुपति झा

१. भारतस्योत्तरे देशे नेपालो नाम राजते।
तस्मिञ्जातो महाभागः झाख्यः पशुपतिः स्वयम्।।

२. नेपालसाम्राज्यपूर्वम् उदयाख्यं मनोहरम्।
प्रणिनाय महाकाव्यं हिन्दीव्याख्यासमन्वितम्।।

३. साहित्ये शब्दशास्त्रे च मीमांसायां कृतश्रमः।
लेभे चोत्तरदेशीयसर्वकारप्रशंसनम्।।

४. होशियारपुरे प्राच्यविमर्शभवने ह्यसौ।
अनर्घं शोधनं कृत्वा कीर्तिं सम्प्राप शाश्वतीम्।।

५२. पि. के. नारायण पिल्लै

१. केरले प्रथिते देशे पिल्लैवंशे महामनाः।
नारायणः कविवरः निष्णातः काव्यकर्मणि।।

२. रामकृष्णं मुनिवरं प्रकृत्यैकां महाकृतिम्।
रचयामास तच्छिष्यं विवेकानन्दयोगिनम्।।

३. अधिकृत्यापि जग्रन्थ महाकाव्यं बुधेडितम्।
अन्यानि स्तोत्रकाव्यानि तदीयानि चकासति।।

४. साहित्ये कोविदश्चासौ मीमांसायां विशारदः।
केरलीयानि काव्यानि संस्कृतेऽन्ववदत्पुनः।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

५३. आत्मारामशास्त्री

१. आत्मारामाभिधः शास्त्री विद्वदग्रेसरः कविः।
सुलयप्रान्ते यस्य जन्म बेङ्गलूरुपुरे पुनः।।

२. प्रौढशालाध्यापकस्तु शब्दशास्त्रशिरोमणिः।
शिरोमणिश्च साहित्ये विख्यातः चित्रकर्मणि।।

३. गानविद्याकोविदोऽसौ साक्रेटीस्नामिकां कृतिम्।
प्रणिनाय किसागौतम्याख्यं कन्नडनाटकम्।।

४. अन्ववादीद्देवगिरा पदैर्मृदुमनोहरैः।
विद्यावाचस्पत्यभिधम् उपाधिं लब्धवान्बुधः।।

५. देवभक्तेन विदुषा विविधा देवता अनु।
सुप्रभातानि काव्यानि प्रणीतानि सतां मुदे।।

५४. कनराड़ी विट्ठलोपाध्यायः

१. विट्ठलोपाध्यायनामाद्वैतवेदान्तपण्डितः।
कनराड़ीग्रामजातो राजते विद्वदग्रणीः।।

२. ध्रुवस्य चरितं तस्य महाकाव्यं विराजते।
प्रह्लादचम्पूरित्यस्ति काव्यमन्यन्मनोहरम्।।

३. श्रीहरिप्रभृतीन्देवान् अधिकृत्य महामतिः।
प्रणिन्ये स्तोत्रकाव्यानि भक्त्या भक्तशिरोमणिः।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

५५. वासिष्ठगणपतिमुनिः

१. वासिष्ठः कविशेखरः कुलपतिः साहित्यविद्यागुरुः
सर्वाम्नायविदग्रणीः श्रुतिशिरोमालाजटालो मुनिः।
वाग्मी वादिगजांकुशः कलियुगव्यासस्तपोदेहभृत्
वेदानामवनाय पावनयशा आविर्बभूवावनौ।।

२. ब्रह्मनिष्ठा तपश्चर्यं कृतिनिर्माणकौशलम्।
अष्टावधाननैपुण्यं ज्योतिर्विज्ञानपाटवम्।।

३. निरन्तरमधुस्यन्दि कवितालास्यवैभवम्।
स्थिरधारणधीशक्तिः श्रवणाद्वीक्षणात्सकृत्।।

४. श्रुतिस्मृतिपुराणानां नवा व्याख्यानवैखरी।
मंत्रशास्त्रे तथा तंत्रे वैदुष्यं राष्ट्रभावना।।

५. संवादचातुरी श्लाघ्या कथानिर्माणकौशलम्।
सर्वाण्येतानि दृश्यन्ते वासिष्ठमुनिपुङ्गवे।।

६. उमादेवीं प्रकृत्यासौ साहस्रं शतकं तथा।
त्रिंशतीं चापि जग्रन्थ तथा रमणगीतकम्।।

७. सद्दर्शनं तत्त्वघण्टाशतकं च महाकविः।
प्रचण्डचण्डिकां चापि प्रणिनाय बुधाग्रणीः।।

८. तथेन्द्राणीसप्तशतीम् अन्यान्यपि महाकविः।
बहूनि प्रणिनायासौ विचित्रपदवाक्यभाक्।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

५६. पण्डिता क्षमाराव्

१. महिलासु महाकाव्यकर्त्री वैदुष्यभास्वरा।
क्षमारावििति विख्याता भारते केन न श्रुता।।

२. गङ्गादेवीसमा काव्यरचनायां विशारदा।
सर्वसम्मानिता तस्याः महाकाव्यचतुष्टयी।।

३. ज्ञानेश्वरस्य चरितं तुकारामस्य चाप्यथ।
स्वातंत्र्यस्य च संग्रामः गीता चोत्तरकालिकी।।

४. स्वातंत्र्यस्येति सर्वाणि प्रणिनाय महामतिः।
कथामुक्तावलीं चान्यां कथाभिश्च मनोहराम्।।

५. क्षमाराव्नामिका चैषा विद्वद्भिर्गुणमानिभिः।
पण्डितोपाधिना विद्वत्सभायां समलंकृता।।

६. तस्याः पुत्र्यपि लीला राविितिख्याता यशोवती।
मातृप्रणीतकाव्यानि रूपकाणि चकार सा।।

५७. परमानन्द शास्त्री

१. अलीगढ़विद्यालये प्राध्यापकपदे स्थितः।
परमानन्दशास्त्रीति विख्यातो विदुषां वरः।।

२. कविना तेन रचितं द्रौपदीवसनं प्रति।
प्रसिद्धं चीरहरणं महाकाव्यं रसावहम्।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

३. खण्डकाव्यं भारतस्य शतकं च मनोहरम्।
दूतकाव्यद्वयं चेति कविकर्म यशस्करम्।।

४. गीतकाव्यद्वयं चापि प्रणीतं कविना पुनः।
उत्तरीयप्रदेशस्य प्रशस्त्यायं विभूषितः।।

५८. जि. वि. तेकेदार्

१. तेकेदार जिवित्येषः प्रवीणः काव्यकर्मणि।
पुणे–पुरे संस्कृतस्य प्राध्यापकपदे स्थितः।।

२. महात्मगान्धिचरितं महात्मायननामकम्।
विनायकाख्य सावर्कर् वीरगाथाभिधं तथा।।

३. महाकाव्यद्वयं राष्ट्रभक्तेनैतेन निर्मितम्।
गीर्वाणगीतनाम्ना च गीतकाव्यं रसान्वितम्।।

४. प्रणीतं विदुषाऽनेन गैर्वाणीशुभकामिना।
"गुञ्जारवे" च बहुधा लेखास्तस्य प्रकाशिताः।।

५९. परड्डि मल्लिकार्जुनः

१. नगरे धारवाड़ाख्ये विश्वविद्यालयः श्रुतः।
तत्रा प्राध्यापको विद्वान् परड्डी मल्लिकार्जुनः।।

२. बसवेश्वरशतकं कबीरशतकं तथा।
प्रणीय द्वयमप्येष टीकयापि व्यभूषयत्।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

३. वचनामृतं च रचितं बसवस्य महात्मनः।
यदालोक्य बुधास्सर्वे विधुन्वन्ति शिरो मुदा।।

६०. जि. बि. पलसुले

१. पुणेपुरे हि विख्यातो भण्डार्कर्शोधनालयः।
जि. बि. पलसुले नामा विद्वांस्तत्र विराजते।।

२. "समानमस्तु वो मनो" रूपकं तेन सुन्दरम्।
प्रणीतं यत्र भावैक्यं राष्ट्रस्य प्रतिपाद्यते।।

३. साहित्ये शब्दशास्त्रे च विद्वानेष महामनाः।
प्रशस्त्या भूषितो राष्ट्रपतिना कविपुङ्गवः।।

६१. श्रीकृष्ण सेमवालः

१. दिल्लीसंस्कृतसाहित्यसंस्थासचिवः श्रुतः।
श्रीकृष्णसेमवालाख्यो विद्वान्विराजते सुधीः।।

२. इन्दिराशतकं भीमशतकं च मनोहरम्।
प्रणीतं कविनानेन तथा भक्तिरसायनम्।।

६२. कालूरि हनुमन्तराव्

१. वर्त्तते भाग्यनगरे (हैदराबाद्) कालूरि हनुमन्तराव्।
वैद्यशास्त्रे निपुणश्च पाण्डित्यं तस्य संस्कृते।।

२. प्रशंसनीयं विद्वद्भिः कृतं तेन कृतिद्वयम्।
साहितीजगतीत्यन्या निबन्धनियमावली।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

६३. गरिकपाटि लक्ष्मीकान्तय्य:

१. बभूव भाग्यनगरे लक्ष्मीकान्तय्यनामकः।
विद्वान् गरिकपाट्याख्यो प्रचार्यश्चांध्रवाङ्मये।।

२. संस्कृते च महाप्राज्ञो विविधाः कृतयः पुनः।
प्रणीतास्तेन विदुषा गुरून् शृङ्गेरिसंस्थितान्।।

३. अधिकृत्यामरगिरा तथान्यद्भव्यभारतम्।
गद्यरामायणं चापि कृतिना तेन निर्मितम्।।

६४. महीधर वेंकटरामशास्त्री

१. राजमहेन्द्रीवासं वेंकटरामाख्यशास्त्रिणं नौमि।
मानसिकरासकेलीनिर्मितिसम्प्राप्तकीर्तिविस्तारम्।।

२. सरोजिनीसौरभेण नाटकेन विराजते।
सामाजिकेन पञ्चाङ्कशेभिना तस्य कौशलम्।।

३. आयुर्वेदे शब्दशास्त्रे साहित्ये च कृतश्रमः।
गद्यकाव्यान्यसंख्यानि रचयामास कोविदः।।

६५. हरिश्चन्द्र रेणापुरकर:

१. रेणापुरकरः श्रीमान् हरिश्चन्द्रो महाकविः।
लाटूरुजन्मा विबुधो हैदराबादनामके।।

२. नगरे लब्धविद्योऽसौ गुलबर्गेऽद्य तिष्ठति।
कवयत्यसौ लोकदृष्टान् गृहीत्वा विषयान् बहून्।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

३. विंशतिशतकान्यस्य कथनस्य निदर्शनम्।
धर्मशास्त्रे श्रुतौ चापि कृतभूरिपरिश्रमः।।

४. संस्कृतान्ध्राग्लहिन्दीषु महाराष्ट्र्यां च वैदुषीम्।
लब्ध्वा विराजते पञ्चभाषाध्ययनकोविदः।।

६६. रहस विहारी द्विवेदी

१. रहसविहारीनामा प्रयागे संबभूव यः।
विश्वविद्यालये जबल्पुरे संस्कृतपण्डितः।।

२. साहित्याचार्यपदवीं लब्ध्वाऽध्यापयत्यसौ।
स्तोत्राणि खण्डकाव्यानि निर्ममे रूपकान्यपि।।

३. यानि तस्य यशो लोके स्थापयन्ति सुनिश्चितम्।
तथा संस्कृतकाव्यानि हिंद्यामन्ववदत्पुनः।।

६७. रामचन्द्र शाण्डिल्यः

१. मुम्बयीपुरवास्तव्यो रामचन्द्रो बुधाग्रणीः।
शाण्डिल्यो निर्ममे काव्यं यात्रामुद्दिश्य किञ्चन।।

२. चच्चवंशमहाकाव्यं कामदूतं मनोहरम्।
ऋतुवर्णनसंज्ञं च खण्डकाव्यं चकार सः।।

३. आयुर्वेदविदप्येष महाविद्यालये बुधः।
आध्यक्ष्यान्निवृत्तस्सन् वसत्युल्हासपुरे सुखम्।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

६८. के. एस्. रामानुजाचार्यः

१. रामानुजाचार्यनामा महाविद्यालये कविः।
अध्यक्षत्वान्निवृत्तोऽद्य बुधो मेधाविसम्मतः।।

२. न्याये व्याकरणे विद्वान् गद्यकाव्योर्वशीं कृती।
विरचय्य तथाशोकवने विह्वलसीतया।।

३. कान्ताय प्रहितं रम्यगिरा सन्देशमेव हि।
गृहीत्वा रचितं काव्यं शुकसन्देशनामकम्।।

४. आचार्यपदवीं लब्ध्वा बुधो वेदपुराणयोः।
पौराणिकोऽध्यापकश्च सौख्येनैवं विराजते।।

६९. कुटुम्बरामशास्त्री

१. कुटुम्बरामशास्त्र्याख्यः पण्डितो रसिकः कविः।
प्रणिनायेन्दुसन्देशं मेघसन्देशबन्धुरम्।।

२. वेदान्तार्थं निगूह्यात्र श्रृङ्गारः प्रतिपादितः।
तथा त्रिचतुराण्येष स्तवनान्यपि निर्ममे।।

७०. रामाशीष पाण्डेयः

१. रामाशीषाख्यपाण्डेयः गीर्वाणीपण्डितः कविः।
बिहारप्रान्ते राञ्च्यां तु महाविद्यालये स्थितः।।

२. कृष्णोदयमहाकाव्यं विरचय्य रसोत्तरम्।
मयूखदूताख्यखण्ड–काव्यं चापि मनोहरम्।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

३. नाटकानि च चत्वारि स्तोत्राण्यपि चकार सः।
वेदसाहित्ययोः शब्दशास्त्रेऽप्याचार्यतां गतः।।

७१. एस्. बि. रघुनाथाचार्यः

१. रघुनाथाचार्यनामा महाविद्वान् जयत्यसौ।
सुरवाणीकेन्द्रविद्या–पीठे तिरुपतीपुरे।।

२. विराजते ख्यातयशाः लब्ध्वा कुलपतेः पदम्।
अनेन रचिता रामविजयाख्या कृतिः शुभा।।

३. साहित्ये न्यायशास्त्रे च तथा मीमांसयोः कृती।
वैदुष्येनानवद्येन शोभते विबुधाग्रणीः।।

७२. वि. आञ्जनेय शर्मा

१. आञ्जनेय इति विश्रुतकीर्तिः
तिरुपतीपुरगतो महितौजाः।
संस्कृते विविधशास्त्रसमूहे
पण्डितो कविरयं स्तुतमेधाः।।

२. मुरारिमुरली नाम नाटकं तस्य पप्रथे।
शबर्याश्च सपर्याऽपि द्वितीयं नाटकं विदुः।।

३. वैभवं वेङ्कटेशस्य काव्यमस्त्यतिसुन्दरम्।
अर्धेन्दुरिव सर्वेषां सम्मोहयति मानसम्।।

४. सूत्रभाष्यस्य या व्याख्या चित्सुखाचार्यनिर्मिता।
साप्यनेनांग्लभाषायां सम्यगेवानुशीलिता।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

७३. मण्डिकल् रामशास्त्री

१. ग्रामोऽस्ति मण्डिकल्नामा तत्राभूत् पण्डिताग्रणीः।
रामशास्त्रीति विख्यातो राजास्थाने कृतस्थितिः।।

२. स मेघप्रतिसन्देशं मेघदूतस्य पूरणम्।
मनोज्ञं रचयामास मधुरं कविकुञ्जरः।।

३. कुम्भाभिषेककाव्यं तु विख्यातं तस्य धीमतः।
उपाधीन्विविधान्लेभे कवित्वे कीर्तिमानसौ।।

७४. मण्डिकल् वरदाचार्यः

१. अग्रहारे मण्डिकले वरदाचार्यनामकः।
विश्रुतः श्रौतमार्गेषु सर्वसद्गुणमण्डितः।।

२. सावित्रीपरिणयाख्या चम्पूस्तेन विनिर्मिता।
यया तुष्टो महीपालः तमास्थानकविं व्यधात्।।

७५. साम्बदीक्षितः

१. गोकर्णे महितक्षेत्रे श्रोत्रियः साम्बदीक्षितः।
महाविद्यालयाध्यक्षो शब्दशास्त्रे च विश्रुतः।।

२. भूकैलासनाटकं तु रचितं तेन धीमता।
प्रदुर्भावो गणपतेः काव्यरूपेण वर्णितः।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

३. वेदविश्रुतनामानि यानीन्द्राग्न्योः चकासति।
सहस्रतानि सर्वाणि ग्रथितानि मनीषिणा।।

७६. के. नञ्जुण्ड घनपाठी

१. नञ्जुण्डशास्त्रिकविना शिवमोग्गा–निवासिना।
मयूरध्वजभूपस्य चरितं सुष्ठु वर्णितम्।।

२. यजुर्वेदे सुविख्यातो घनपाठीति विश्रुतः।
कर्मठः शद्धचरितः वेदमार्गे सदास्थितः।।

७७. गलगलि रामाचार्यः

१. गलगलीशब्दपूर्वो रामाचार्यो बहुश्रुतः।
पत्रिका मधुरवाणी येन सम्पादिता शुभा।।

२. सोऽयं कवीश्वरः ख्यातः काव्यनिर्माणकौशलम्।
विंदति यस्य सर्वेषां सुरवाणीविदां मुनः।।

३. यदुवंशस्य चरितं महाकाव्यं मनोरमम्।
शतकानि बहून्यस्य प्रथितानि महीतले।।

४. चरखाशतकं चापि सत्यध्यानगुरोस्तथा।
गान्धीटोपीति विख्यातं शतकं तु तृतीयकम्।।

५. तथाश्वधाटीशतकं सर्वं सौशब्द्यमण्डितम्।
अनेन विदुषा लब्धे प्रशस्ती राज्यराष्ट्रयोः।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

७८. विश्वनाथ सत्यनारायणः

१. आंध्रेषु प्रथितो विद्वान् ज्ञानपीठप्रशस्तिभाक्।
सत्यनारायणो धीमान् विश्वनाथपदोत्तरः।।

२. कविसम्राडितिख्यातमुपाधिं लब्धवानसौ।
गुप्तपाशुपतादीनि त्रीण्यनेन मनीषिणा।।

३. पुस्तकानि प्रणीतानि प्रथितानि हितानि च।
आंध्रभाषामया ग्रन्था रचिता विदिता भुवि।।

७९. सि. जि. पुरुषोत्तमः

१. मैसूरुनगरे रम्ये विद्वन्मण्डलमण्डिते।
सि. जि. पुरुषोत्तमार्यो संस्कृताध्यापको बुधः।।

२. नवीनच्छन्दसा तेन कविना रचितान्यपि।
राजन्तेऽद्यतनानीव मुखानि किल सुभ्रुवाम्।।

३. सम्यग्विभाजिता तेन द्विधा काव्यतरङ्गिणी।
कुवेम्पुनाटकान्यस्य सर्वज्ञवचनं तथा।।

४. नीतानि संस्कृतगिरा माधुर्यं सुष्ठु बिभ्रति।
आदिचुंचनगिर्याख्यं सुप्रभातं विनिर्मितम्।।

५. राज्योत्सवप्रशस्तिश्च लब्धाऽनेन मनीषिणा।
साहित्यसेवया तुष्टः सर्वकारस्तु यां ददौ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

८० भागीरथीप्रसाद त्रिपाठी
(वागीशशास्त्री)

१. वाराणस्यां राजमाने सम्पूर्णानन्दनामके।
विश्वविद्यालये प्राज्ञो निर्देशकपदे स्थितः।।

२. भागीरथीप्रसादाख्यः त्रिपाठी विद्वदुत्तमः।
वागीशशास्त्रीत्येतस्य काव्यनाम प्रकीर्तितम्।।

३. कविनाऽनेन काव्यानि प्रणीतानि मनीषिणा।
रम्याणि विदुषां यानि हरन्ति प्रसभं मनः।।

४. आतंकवादशतकं नर्मसप्तशती तथा।
टाल्स्टाय् कथासप्तकं च कीर्तनीयानि सर्वदा।।

५. कृषकाणां नागपाशो नाटकं च रसान्वितम्।
शास्त्रे व्याकरणे विज्ञ आचार्यपदवीं गतः।।

६. विद्यावारिधिरप्येषः वाचस्पतिरितीरितः।
महोपाध्यायपदवीमहापूर्वो विराजते।।

८१. रमेशचन्द्र शुक्लः

१. देहलीनगरे रम्ये निवासे बहुदृश्वनाम्।
रमेशचन्द्रस्तेजस्वी गैर्वाणीपण्डितः सुधीः।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

२. गान्धीगौरवमेकं तु राष्ट्रभक्तिप्रचोदकम्।
इन्दिरायशसश्चापि तिलकं तु द्वितीयकम्।।

३. काव्यद्वयं मनोहारि कविनाऽनेन निर्मितम्।
वाण्या नेत्रद्वयमिव काव्यज्ञानां प्रकाशते।।

४. संस्कृतस्य प्रतिष्ठानं देहल्यां यद्विराजते।
शास्त्रचूडामण्युपाधिस्तेन दत्तो मनीषिणे।।

८२. सिद्धेश्वर चट्टोपाध्यायः

१. विख्यातो वङ्गदेशेऽस्ति विद्वान् सिद्धेश्वरः कविः।
चट्टोपाध्यायनाम्ना तु प्रसिद्धिं परमां गतः।।

२. चत्वारि रूपकान्यस्य विनोदप्रचुराणि हि।
अथ किम्नामकं त्वेकं स्वर्गीयहसनं तथा।।

३. नानाविताडनं चापि धरित्रीपतिपूर्वकम्।
विराजते निर्वचनं इति चत्वारि भूतले।।

८३. वीरेन्द्रकुमार भट्टाचार्यः

१. कलकत्तापुरवासी श्री भट्टाचार्यः कवीश्वरः।
विराजते येन विदुषा नाटकानि प्रणिन्यिरे।।

२. नवसंख्यानि रसिकावर्जनान्युज्ज्वलानि च।
कविकालिदासं श्रीगीतगौराङ्गं च मनोहरम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

३. मेघदौत्यं शूर्पणखाभिसारं हास्यसंप्लुतम्।
व्यायोगो वेष्टनायाश्च चत्वारो विदिता हि नः।।

८४. यतीन्द्रविमल चौधरी

१. यतीन्द्रचौधरी नाम कवीन्द्रः संप्रकाशते।
लीलायते च जिह्वाग्रे विदुषो यस्य भारती।।

२. अष्टादश प्रणीतानि रूपकाणि महीतले।
व्यासकल्पेन कविना पर्वाणीव चकासति।।

३. देशप्रियो देशबन्धुः हरिदासो महाप्रभुः।
सुभाषश्च सुभाषोऽपि निष्किंचनयशोधरः।।

४. अरविन्दो भारतस्य हृदयं भास्करोदयः।
एतानि विदितान्यद्य भारतं महिमान्वितम्।।

८५. रमा चौधरी

१. रवीन्द्रभारती–विद्यालये कुलपतेः पदम्।
व्यराजत रमाचौधर्यभिधैषाऽधितस्थुषी।।

२. अनया रचिता भाति रूपकाणां तु विंशतिः।
अभेदानन्दमेतस्याः तथा नगरनूपुरम्।।

३. युगजीवनमस्त्यन्यत् निवेदितनिवेदितम्।
चैतन्यचैतन्यमपि तथा भारततैलकम्।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

४. कविकुलकोकिलं च तथा शंकरशंकरम्।
अष्टावेवाद्य काव्यानि विदितानि मयाधुना।।

५. षड्दर्शनमुपाश्रित्य रचिता आंग्लभाषया।
त्रयो ग्रन्था विराजन्ते विदुष्या इति विस्मयः।।

८६. जयदेव जानी

१. जयदेव जानी जीयात् गैर्वाणीकविशेखरः।
रसराज इति ख्यातः तस्य नाटकसंग्रहः।।

२. षट्कं विराजते स्नेहचक्रं स्नेहस्य व्यञ्जकम्।
चक्रारपंक्तिः वृत्तेश्च वैमनस्यं विभाव्यते।।

३. पापपूरुषमप्यस्ति कुटुम्बानन्दमित्यपि।
अवतारं महाविष्णोः दशमं चापि कीर्तितम्।।

४. एवमन्यानि काव्यानि रचितानि मनीषिणा।
सोऽयं बरोड़ानगरे प्राध्यापकपदे स्थितः।।

८७. श्री जीवन्यायतीर्थः

१. श्रीजीवन्यायतीर्थाख्यो कलकत्ता पुरे कविः।
राजहंसीयते कीर्तिर्यस्य पण्डितमानसे।।

२. नाटकान्यस्य राजन्ते त्रिंशत्संख्यानि भूतले।
कैलासनाथविजयं तथा पुरुषपुङ्गवम्।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

४. चण्डताण्डवमप्यस्ति तथा भारतसङ्कटम्।
चौरचातुर्यमित्यादिः प्रथते काव्यसंग्रहः।।

८८. लीलाराव् दयालु

१. क्षमाराव् दुहिता मातृसदृशी विदुषी भुवि।
लीलारावभिधानेन प्रथते कविसत्तमा।।

२. एकाङ्कनाटकान्यास्याः त्रयोविंशतिरेव तु।
लीलानाटकचक्राख्ये विन्यस्तानि चकासति।।

३. श्रीरामदासचरितं तुकारामस्य जीवितम्।
तथैव बालविधवेत्यादि तन्नामसंग्रहः।।

८९. नीर्पाजे भीमभट्टः

१. नीर्पाजे भीमभट्टाख्यो केरले विदुषां वरः।
कविः कासरगोड्वाख्ये पुरे वसति सत्तमः।।

२. काश्मीरराज्यसन्धाने यो भारतसमुद्यमः।
विषयं तं समुद्दिश्य प्राणैषीन्नाटकं कविः।।

३. राजकीयेऽपि संस्तुत्यः साहित्ये च शिरोमणिः।
कथास्तोत्राणि च तथा ग्रथितानि मनीषिणा।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

९०. कोगण्टी सीतारामाचार्यलु:

१. कोगण्ट्युपाधिराचार्यः सीतारामाभिधः कविः।
गुण्टूरुनगरे भूतपूर्वप्राध्यापकः शुचिः।।

२. तर्के व्याकरणे चैव धीमानेष शिरोमणिः।
चत्वारि नाटकान्यस्य विराजन्ते मनीषिणः।।

३. आनूरवं चैकलव्यं प्रतिज्ञाकौत्समित्यपि।
पद्मावतीपादपूर्वं नाटक चापि विश्रुतम्।।

४. प्रशस्तिरांध्रसाहित्य–संस्थादत्तास्य धीमतः।
प्रवीणोऽध्यात्मविद्यायाः कीर्तिमानेष राजते।।

९१. जे. वि. चौधरी

१. जेविचौधरिनामास्ति प्रसिद्धः संस्कृते कविः।
पूनाख्यनगरे भाण्डार्करसंस्थानपण्डितः ।।

२. कविना येन गैर्वाण्यां रसवन्ति प्रणिन्यिरे।
षड्रूपकाणि विदुषां रञ्जयन्ति मनो ध्रुवम्।।

३. शक्तिशारदमित्यस्ति तथैवं भास्करोदयम्।
रघुनाथं दीनदासम् अधिकृत्यान्यदीरितम्।।

४. आनन्दराध इत्यादि राजते विदुषां मुदे।
सर्वं समर्पितं तेन गीर्वाणीचरणाम्बुजे।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

९२. हरिदास सिद्धान्तवागीशः

१. कविः सिद्धान्तवागीशो हरिदास इति श्रुतः।
कलकत्तापुरे धीमान् अवात्सीत्संस्कृतप्रियः।।

२. वङ्गीयानां प्रतापञ्च तथा मेवारवासिनाम्।
पौरुषं नाटकद्वन्द्वे सम्यगेवास्ति वर्णितम्।।

३. शिवाजीचरितं चैव विरजायाः सरोजिनी।
एतच्चतुष्कं प्रथितं रूपकाणां मनीषिणः।।

९३. दीपक घोषः

१. कलकत्तापुरे रम्ये विश्वविद्यालये शुभे।
घोषो दीपक इत्यस्ति प्राचार्यो विद्वदग्रणीः।।

२. देववाण्यां व्यतनुत प्रथितानि बहून्यसौ।
विलापपञ्चिका नाम काव्यं कारुण्यवर्धकम्।।

३. श्लोकपञ्चशतं यत्र गुम्फितं ललितैः पदैः।
काव्यं च राजनीत्याख्यं तथाऽभावविमर्शनम्।।

४. बुधानां रञ्जकं शास्त्रं सर्वशास्त्रार्थशोधकम्।
रवीन्द्रगीतमपरं वङ्गगीःपरिवर्तितम्।।

५. अद्वैते शाङ्करे सोऽयं शिरोमणिपदं वहन्।
विपुलान्विदधे शिष्यान् पीएच्‌डी–पदवीधरान्।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१४. वनेश्वर पाठकः

१. राँचीविद्यालये धीमान् वनेश्वरपदाभिधः।
प्राचार्यः पाठकः सोऽयं निवृत्तिसुखभाजनम्।।

२. अनेन कविना काव्यान्यनेकानि प्रणिन्यिरे।
प्लवङ्गदूतं विक्रान्तकर्णं विभ्रान्तनारदम्।।

३. कादम्बरी नाटिका च रक्तदानमथापरम्।
इत्यादि काव्यरत्नानि राजन्तेऽस्य महाकवेः।।

४. स्थाने पुरस्कृतो राष्ट्रपतिनायं बुधः स्वयम्।
प्राज्ञः पुरस्कृतश्चापि यू. पि. साहित्यसंस्थया।।

५. एम्ये(M.A.)पदं बिभर्त्येषः हिन्दीसंस्कृतभाषयोः।
साहित्ये शब्दशास्त्रे चाप्याचार्यपदवीमयम्।।

१५. भास्कराचार्य त्रिपाठी

१. त्रिपाठी भास्कराचार्यः भोपालनगरे वसन्।
साहित्याचार्यपदवीं धरन् एम्येपदं तथा।।

२. विख्यातिं गमितः काव्यैः सर्वैर्बुधमनोरमैः।।
अजाशती–निर्झरिणी–मृत्कूटैः खण्डकाव्यकैः।।

३. लक्ष्मीलाञ्छननाम्ना च रूपकेण महाकविः।
मध्यप्रदेशसाहित्यसंस्थयापि पुरस्कृतः।।

४. बुद्धिमानाशुकवितानिर्माणे मार्मिकोऽपि सः।
विभिन्नकविगोष्ठीषु बभावध्यक्षतां वहन्।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

९६. रामजी उपाध्यायः

१. उपाध्यायोपधिः श्रीमान् रामजीति बहुश्रुतः।
विश्वविद्यालये प्राज्ये प्राचार्यः सागरे पुरे।।

२. विश्रान्तोऽद्य खण्डकाव्यं द्वासुपर्णं लिलेख सः।
गते शतत्रये काले यानि संस्कृतभाषया।।

३. कृतानि नाटकान्येष संजग्राह प्रयत्नतः।
पुरस्कृतो राष्ट्रपतेः सम्मानेन बुधोत्तमः।।

९७. वै. नागेश शर्मा

१. नागेशशर्मा विबुधो बेङ्गलूरुपुरे शुभे।
आंध्रप्रदेशसञ्जातो कविर्वाग्मी वसत्ययम्।।

२. शिरोमणिर्न्यायशास्त्रे साहित्ये रसिकः पुनः।
प्रणीतवान् खण्डकाव्यं नेत्रोन्मीलननामकम्।।

३. शङ्कराचार्यवर्यस्य शारदायाश्च सत्कविः।
सुप्रभातद्वयं रम्यं प्रणीय ख्यातिमाप सः।।

९८. विश्वेश्वर दीक्षितः

१. तुर्वेकेरेग्रामजातो विश्वेश्वरसुधीर्बभौ।
मैसूरसंस्कृतशालायां साहित्याध्यापकः कविः।।

२. बहुश्रुतो विभिन्नेषु शास्त्रेषु श्रोत्रियो बुधः।
सुप्रभातद्वयं चक्रे शारदायाः मनोहरम्।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

३. नंजुण्डेश्वरनाम्नश्च श्रीकण्ठस्वामिनः शुभम्।
तथा श्रीशङ्करार्यस्य रमणीयं स्तवं जगौ।।

९९. महालिङ्ग शास्त्री

१. महालिङ्गशास्त्री महान्यायवेत्ता
महान्त्यस्य कृत्यानि लोकस्तुतानि।
नवानां च कर्तैष सद्रूपकाणां
प्रणिन्ये तथा गीतकाव्ये च स द्वे।।

२. कविर्भ्रमरसन्देशं दूतकाव्यं चकार सः।
व्याजोक्तिरत्नावलिरित्यन्यन्मोददं नृणाम्।।

३. अन्यापदेशशतकं प्राणैषीत्स महाकविः।
अप्पय्यदीक्षितेन्द्रस्य न चित्रं वंशजस्य तत्।।

१००. मूलशङ्कर माणिकलाल याज्ञिकः

१. मूलशङ्कर माणिक्यलालयाज्ञिकनामकः।
महाकविर्महाप्राज्ञः साहित्यमणिरित्यसौ।।

२. प्राप्तोपाधिर्बहून्ग्रन्थान् निर्ममे विदुषां मुदे।
गुर्जरप्रान्तजातोऽयम् अरविन्दाख्ययोगिनः।।

३. दर्शने सक्तधीश्चक्रे काव्यानि रसवन्ति हि।
रूपकाणां त्रयं गीतकाव्यं चापि मनोहरम्।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१०१. मुल्लपूडि नारायण शास्त्री

१. आंध्रे गुण्टूरुजिल्लायां रेपल्लीनामके शुभे।
विद्यालये शङ्कराख्ये प्राध्यापकपदे बभौ।।

२. मुल्लपूडीति विख्यातः शास्त्री नारायणाख्यया।
न्याये व्याकरणे पूर्वमीमांसायां बुधो ह्यसौ।।

३. पुत्रसञ्जीवनं नाम महाकाव्यं लिलेख सः।
शाकुन्तलं चान्ववादीत् नाटकम् आंध्रभाषया।।

१०२. प्रभुदत्त स्वामी

१. मेरठ् नाम्ना सुविख्याते नगरे कविशेखरः।
प्रभुदत्ताख्यया स्वामी प्राणैषीत्पूर्वभारतम्।।

२. महाकाव्यं तथा स्तोत्रकाव्यं च कुसुमाञ्जलिम्।
देवकीदेवनं नाम खण्डकाव्यं च विश्रुतम्।।

३. न्याये व्याकरणे शास्त्री पदभाक् पण्डितोत्तमः।
साहित्यरत्नमित्यस्ति तस्योपाधिर्महाकवेः।।

१०३. भरत पिशारटी

१. केरले तिरुचि प्रान्ते संस्कृताध्यापकः कविः।
मनोज्ञकाव्यनिर्माता भरतस्स पिशारटी।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

२. आयुरारोग्यसौख्यं च तथान्यत्त्वेकभारतम्।
रससृत्कामदहनं नाटकत्रितयं जगौ।।

३. तथैव रचिता तेन रसवद्गानमालिका।
कथाश्रीरामचरितं गद्यवाक्यैर्विभूषितम्।।

४. अन्यद्ग्रथितमेतेन यद्भवेत्कौतुकं महत्।
शाकुन्तलं प्रसिद्धं यत् कालिदासस्य सत्कवेः।।

५. शताधिकद्वादशधा कल्पितं स्वमनीषया।
दृश्यानुगुण्येन सर्वं छात्राणां च हिते व्यधात्।।

१०४. वेलूरि सुब्बराव्

१. वेलूरि सुब्बरावाख्यः आंध्रदेशे महामनाः।
विश्वविद्यालयाचार्यो संस्कृस्याभवत्कविः।।

२. माणिक्यशास्त्रिणां ख्यातयशसां विदुषामसौ।
न्यायवेदान्तमीमांसाशास्त्रेष्वन्तेवसन्बभौ।।

३. दाक्षिणात्यं मेघदूतं मन्दाक्रान्तैर्बबन्ध सः।
मनोरमं स्वकान्तायै संदिष्टं यत्र दृश्यते।।

१०५. कुटुम्ब शास्त्री

१. आंध्रप्रदेशे सञ्जातो मीमांसाद्वयविज्ञताम्।
कुटुम्बशास्त्री सम्प्राप्य विख्यातोऽद्वैतबोधने।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

२. क्षेत्रे तिरुपतौ प्राज्ञः केन्द्रविद्यालये स्थितः।
ततः पाण्डिचेरीपुर्यां विश्वविद्यालये सुधीः।।

३. संस्कृताचार्यपदवीम् अधिष्ठाय विराजते।
कामकोटिगुरून्भक्त्या स्तुवन्वृत्तैर्मनोहरैः।।

४. प्रपत्तिं श्रीगुरोर्बध्नन् स्तोत्रकाव्यं मनोहरम्।
रचयामास सद्वृत्तः तथान्या विपुलाः कृतीः।।

१०६. के. राजन्न शास्त्री

१. धर्मपुर्याम् आंध्रदेशे विदुषामाश्रये बभौ।
राजन्नशास्त्री सूरीणामग्रणीः विदुषां मतः।।

२. पाण्डित्यं तस्य विख्यातं संस्कृतांध्राख्यभाषयोः।
विश्वविद्यालये त्वेषः हैदराबादसंस्थिते।।

३. प्राचार्य आंध्रभाषायां गैर्वाण्यां श्रद्धया पुनः।
चक्रे मनोहरं काव्यं नाम्ना तु सुमनोऽञ्जलिम्।।

४. सुधाकरं वसुमतीशब्दपूर्वं च रूपकम्।
विश्रान्तोऽध्यापनादद्य नयते शान्तजीवनम्।।

१०७. हेच्. वि. नागराज राव्

१. मैसूरूनगरे रम्ये प्राच्यसंशोधनालये।
विख्यातो विदुषां श्रेष्ठो नागराजपदश्रुतः।।

२. पाणिनीये व्याकरण साहित्ये भारतागमे।
प्राज्ञः कविवरो धीमान् रचयामास सत्कृतीः।।

CC-0. Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

३. प्रशंसनीयं तत्रास्ति मनोज्ञं रूपकत्रयम्।
दाम्पत्यकलहस्त्वेकः द्वितीया तु समुद्यता।।

४. विदुलापुत्रसम्बन्धी तृतीयं रूपकं श्रुतम्।
गद्यं मालविकानाम कालिदासकृतिश्रितम्।।

५. अनूदिताः कथाश्चान्याः हरन्ति विदुषां मनः।
आंग्लभाषापण्डितोऽसौ विदेशेषु प्रथां गतः।।

१०८. शिवसागर त्रिपाठी

१. प्राचार्यः संस्कृते धीमान् त्रिपाठी शिवसागरः।
राजस्थाने जयपुरे विश्वविद्यालये सुधीः।।

२. गान्धीगौरवनाम्नाऽसौ महाकाव्यं प्रणीतवान्।
प्राणाहुतिं रूपकं च पञ्चगव्यं कथाश्रितम्।।

३. छन्दःशाकुन्तलं नाम मनोज्ञमपि नाटकम्।
जग्रन्थ सर्वरसिकश्लाघनीयं मनोहरम्।।

४. राजस्थानस्य साहित्यसंस्थया मानितः पुनः।
विद्वान्विराजते ह्येषः राजस्थानशिरोमणिः।।

१०९. पद्मशास्त्री

१. राजस्थाने जयपुरे .पद्मशास्त्री महामनाः।
संस्कृताध्यापको भाति विचारैर्नूतनैः शुभैः।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१ सोवियत्देशयानेन लब्धसंस्कारयोगिना।
तेन प्रणीतं कविना काव्यं तु लेनिनामृतम्।।

२. स्वराज्यं खण्डकाव्यं च सिनेमाशतकं तथा।
मदीया सोवियत्यात्रा गद्यकाव्यं च राजते।।

३. नेहूपुरस्कारशोभी राजस्थानपुरस्कृतः।
सम्मानितश्चोत्तरेण प्रदेशेन प्रकृष्टधीः।।

११०. विद्याधर शास्त्री

१. राजस्थानमणिर्विद्याधरशास्त्रिमहोदयः।
अन्वर्थं नाम तस्येदं विद्यावाचस्पतिश्च सः।।

२. विद्यारत्नमुपाधिश्च कविसम्राडिति श्रुतः।
मानितो राष्ट्रपतिना सत्यं विद्यानिधिस्स्वयम्।।

३. हरनामामृतं विश्वमानवीयं कृतिद्वयम्।
महाकाव्यमिति ख्यातं खण्डकाव्यं चतुष्टयम्।।

४. चन्द्रयात्रा तथा ख्यातं लहरीत्रितयं पुनः।
स्तोत्रद्वयं चानुभव–शतकं भक्तिनिर्भरम्।।

५. मन्दाकिनीति विख्याता स्तुतिरानन्दपूर्विका।
इत्यादिभिः काव्यरत्नैः भासते कविशेखरः।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१११. एस्. रङ्गनाथः

१. आंध्रदेशे प्रसिद्धेऽस्ति कोलाराभिधमण्डलम्।
तत्र जातः कविरयं वंशे नन्दवरद्विजे।।

२. मातृसौख्याद्वंचितोऽसौ यदासीत्पञ्चविशंतिः।
बेङ्गलूरुपुरे रम्ये इदानीं तु वसत्यसौ।।

३. तस्यास्ति जनको धीमान् रामस्वामीति विश्रुतः।
आसीत्प्राध्यापकः पूर्वं विश्वविद्यालये पुनः।।

४. संस्कृतांग्लेषु निष्णातः सर्वकारेषु मानितः।
विदेशेषु बहुख्यातः अभ्यागतपदे पुनः।।

५. काव्यकर्तुः पतिप्राणा पत्न्यस्ति किरणप्रभा।
अनिरुद्धः सुपुत्रश्च पठने क्रीडने रतः।।

६. शैशवेऽभ्यस्तवान्कामम् अष्टवर्षाणि संस्कृतम्।
अद्वैते प्रौढिमा तस्य ऋग्वेदे च दृढा रतिः।।

७. वेदभूषणेति नाम्ना पुरस्कृतो युवा कविः।
इदानीं तु प्रवाचकः महाविद्यालये पुनः।।

८. प्रारब्धेऽयं कृतिर्याभूत् महीशूरपुरे मया।
मैनपुर्यां समानीता पूर्णतां हर्षितात्मना।।

९. जयन्तु ते सुकृतिनः संस्कृते कवयन्ति ये।
शृण्वन्तश्च पठन्तश्च जयन्तु विबुधाः समे।।

रचनापूर्तितिथिः वामनजयन्ती 14.9.1997 ई. रचनापूर्तिस्थानम् मैनपुरी (उ०प्र०)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

अर्वाचीनसंकृतम्

Digitized by Arya Samaj Foundation Chennai and eGangotri

(R. N. 34554/79

आवरणपृष्ठस्य	2000.00 प्रतिपृष्ठम्
अन्यपृष्ठानाम्	1000.00 प्रतिपूर्णपृष्ठम्
अर्धपृष्ठस्य	500.00

अर्वाचीनसंस्कृतस्य ग्राहकशुल्कम्

(१९९७त: प्रभावि)

संस्थानां कृते	वार्षिकं (भारते) रु0 60.00
	वार्षिकं (विदेशेषु) यू0एस0 डालरा: 10
	आजीवनं (भारते) रु0 400.00
	आजीवनं (विदेशेषु) यू0एस0 डालरा: 100
व्यक्तीनां कृते	वार्षिकं (भारते) रु0 40.00
	वार्षिकं (विदेशेषु) यू एस0 डालरा: 10
	आजीवनं (भारते) रु0 400.00
	आजीवनं (विदेशेषु) यू0एस0 डालरा: 100
डाकव्यय:	[यदि पंजीकृत (रजिस्टर्ड) डाकद्वारा अर्वाचीनसंस्कृतस्य सर्वेऽप्यङ्का: प्रेष्येरेन्]
	भारते — रु0 48.00
	विदेशेषु — यू0एस0 डालरा: 20

विगतांकानां (Back Volumes) वार्षिकं मूल्यम् रु0 100/-

देववाणी-परिषद: सदस्यानां सभासदां च कृते पत्रं नि:शुल्कं प्रेष्यते । किन्तु पञ्जीकृतडाकद्वारा पत्रप्रेषणार्थं तैरपि डाकव्ययो देय: स्यात् । ग्राहका: ग्राहकशुल्कम् 'अर्वाचीनसंस्कृतम् (Arvacheenasanskritam) 'इत्यंकितेन दिल्यां/नवदिल्यां प्रदेयेन बैंक/ड्राफ्टेन धनादेशेन (M.O.) वा निम्नलिखिते संकेते प्रेषयितुं प्रार्थ्यन्ते :-

सम्पादक:
अर्वाचीनसंस्कृतम्
देववाणी-परिषद्, दिल्ली
आर-6, वाणी-विहार:, नयी दिल्ली-110059 (भारतम्)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri
Arvacheenasanskritam (Olv) R. N. 34554/79

देववाणी–परिषदा प्रकाशिताः केचन ग्रन्थाः

२३.	राधाकृष्णरसायनम् (श्री ओट्टूर उण्णि नम्बूदिरीपादः)	रु० १५०.००
२८.	स्फूर्तिसप्तशती (डा० शिवदत्तशर्मा चतुर्वेदी)	रु० १५०.००
२९.	साहित्यकौतुकम् (पं० टी०वी० परमेश्वर अय्यरः)	रु० १५०.००
३२.	श्रीबदरीशसुप्रभातम् (डा० सी०आर०स्वामिनाथन्)	रु० १०.००
४२.	पुरश्चरणकमलम् [नाटकम्] (डा० रमाकान्त शुक्लः)	रु० १०.००
४४.	रसदर्शनम् (डा० रमेशचन्द्र शुक्लः)	रु० १५०.००
४५.	संस्कृत साहित्य में राष्ट्रिय भावना (डा०हरिनारायण दीक्षित)	रु० ३००.००
४७.	भाति मौरीशसम् (डा० रमाकान्त शुक्लः)	रु० १०.००
४९.	कूहा [काव्यम्] (डा० उमाकान्त शुक्लः)	रु० ६०.००
५३.	सारस्वतसमुन्मेषः (डा० विन्ध्येश्वरीप्रसाद मिश्रः)	रु० ६०.००
५९.	अध्यात्मरामायण में अध्यात्म–चिन्तन (श्री त्रिगुणानन्द शुक्ल)	रु० १५०.००
६४.	लक्ष्मीशतकम् (डा० वरदाचार्य कण्णन्)	रु० ६०.००
६५.	ऋतम् [उपन्यासः] (डा० केशवचन्द्र दाशः)	रु० ६०.००
७२.	श्रीगान्धिचरितम् (प्रो० चारुदेव शास्त्री)	रु० १५०.००
७४.	दूतप्रतिवचनम् (डा० इच्छाराम द्विवेदी)	रु० ६०.००
७५.	भाति मे भारतम् [काव्यम्] (डा० रमाकान्त शुक्लः)	रु० १८.००
८१.	नाट्यसप्तकम् [नाटकम्] (डा० रमाकान्त शुक्लः)	रु० २००.००
८२.	जय भारतभूमे ! [काव्यम्] (डा० रमाकान्त शुक्लः)(यन्त्रस्थः)	रु० ३०.००
८३.	श्रीहनूमत्पञ्चाशत् तथा शरणागतिषोडशी (श्रीसुन्दरराजः)	रु० १०.००
८४.	भारतजनताहम् [कवितासंग्रहः] (डा० रमाकान्त शुक्लः)	रु० २००.००
८५.	सत्प्रेरणानाटकम् (डा० इच्छाराम द्विवेदी "प्रणवः")	रु० १००.००
८६.	निस्यन्दिनी [संस्कृतगीतसंग्रहः] (डा०जनार्दनप्रसाद पाण्डेयः"मणिः")	रु० १००.००

"देववाणी–परिषद्, दिल्ली"–कृते डा० रमाकान्त शुक्लेन "प्रवीण प्रिंटिंग सर्विस, उत्तम नगर, नई दिल्ली–११००५९ फोन : ५६४०३२४" इति मुद्रणालये मुद्रापयित्वा "आर–६ वाणी विहारः, नई दिल्ली–११० ०५९" त प्रकाशितम्–अर्वाचीनसंस्कृतम् (१९/३–४) प्रधानसम्पादकः डा० रमाकान्त शुक्लः
प्रकाशनतिथिः १५.१०.१९९७ अस्यांकस्य मूल्यम् रु० ४५.०० Rs. 45.0
CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Entered in Database

Signature with Date

10/5/08

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Samaj Foundation Chennai and eGangotri